ईसब्नीतिकथाः ।

प्रथमो भागः ।

नारायण बाळकृष्ण गोडबोले.

मूल्यं ६ आणकाः ।

॥ श्रीः ॥

ईसब्नीतिकथाः ।

ÆSOP'S FABLES.

PART I.

CONTAINING SIXTY (1-60) FABLES OF ÆSOP

TRANSLATED INTO SANSKRIT

From the Marâthî Text of

SADÂS'IVA KÂS'INÂTHA CHHATRE,

BY

NÂRÂYAṆA BÂLKRISHNA GODABOLE, B. A.

SANSKRIT TEÂCHER, ELPHINSTONE HIGH SCHOOL, BOMBAY.

EIGHTH EDITION.

PUBLISHED

BY

PÂNDURANG JÂWAJÎ,

PROPRIETOR OF THE 'NIRNAYA-SAGAR' PRESS,

Bombay:

1924.

अथ
ईसब्नीतिकथाः ।

कथा प्रथमा (१) ।

रत्नकुक्कुटयोः ।

द्वित्राभिस्तरुणकुक्कुटीभिः सहावकरनिकरं विकिरतस्तल्लब्धापूर्ववस्तुभिस्ता रञ्जयतः कस्यापि तरुणकुक्कुटस्य दृष्टिपथं सहसा किमपि रत्नमाजगाम । तद्वीत्येदं रत्नमिति स जज्ञौ, परं कस्तस्योपयोग इति न बुबोध । ततः स्वमौढ्यं निह्नुवानस्तद्धर्षयितुमुपचक्रमे । स पक्षौ विसार्य शिरोऽवधूय वक्रवक्त्रस्तन्निजगाद–"रे, त्वं हार्यसि । परं कस्तवोपयोगः । अहं त्वेवं मन्ये यद्भूतलगतानि निखिलान्यपि रत्नान्येकस्य यावनालकणस्य षोडशीमपि कलां न स्पृशन्ति" ।

तात्पर्यम् ।

पुरुषस्य विद्यालाभः साध्वसाधुनीत्यनीतिपरिच्छेदश्चोपयोगज्ञानाभावे ताम्रचूडस्य रत्नमिव निष्प्रयोजनः । एवंविधा विद्यासत्त्वेऽपि मूर्खा आत्मनो मौर्ख्यं छादयितुकामा विद्यादीनुपहस्य स्वं मतं प्रतिपादयन्ति । एवं च भाषन्ते–"किंप्रयोजना विद्यादिगुणाः । सद्यःफला गुणा एव गुणाः" इति । एवं वदन्तो विद्वांसोऽपि हीनवृत्तयो भवन्ति ।

कथा द्वितीया (२) ।

वृकाजशिश्वोः ।

एकदा घर्मकाल आतपक्रान्त एकोऽजशिशुः पिपासार्दितो भूत्वा जलं पातुमदूरवर्तिनीमल्पसरितमगमत् । तत्रोन्नत-

प्रदेशे जलं पिबन्तं वृकमीक्षित्वा निम्नप्रदेशभागजलमादातुमारेभे। वृकस्तु दूरात्तं दृष्ट्वा "केनापि निमित्तेन कलहमुत्पाद्याहमेनं व्यापादयामि भक्षयामि च" इति मनसि चकार। ततस्तमभिगत्योचे—"आः पाप, कथं मया तृट्शमः कर्तव्यो यद्येवं जलमाविलयसि। किंनिमित्तोऽयमनुचितारम्भ इति तूर्णं निवेदय। नो चेद्वध्यो भवसि"। भीतः सोऽजशिशुः सविनयमवादीत्—"भो वृकश्रेष्ठ, यदत्रभवान्वदति तत्कथं भवेत्। त्वत्तो यज्जलं वहति तदहं पिबामि। एवं स्थिते मया कलुषितं जलं प्रतीपं त्वां कथं प्रवहेत्"। वृकोऽगदीत्—"अस्तु नामैतत्। त्वमधमोऽसि। षण्मासात्प्राञ्मां त्वमशप इत्यहमश्रृणवम्"। स शिशुरवादीत्—"हा कष्टम्, कथमस्य संभवः। यस्य जातस्य मम मासत्रयमपि न पूर्णं सोऽहं षण्मासात्प्राग्भवन्तमशपमिति कथं संभवेत्"। वृकोऽत्रापि निरुत्तरोऽभूत्। ततो महतावेशेन नेत्रे विस्फार्य दन्तैर्दन्तान्विघट्टयन्पादाघातैर्भुवं कम्पयन्निव तमुपसंगम्य तारस्वरेणावोचत्—"भो दास्याः पुत्र, यदि त्वं नाशाप्सीस्तर्हि शप्त्रा तव पित्रा भाव्यम्। नो विशेषः"। एवमुक्त्वा स तं दीनमवधीत्।

तात्पर्यम्।

दुष्टाशयवतो बलवतोऽग्रे सत्यं मां त्रास्यत इति दुर्बलो न तिष्ठेत्।

कथा तृतीया (३)।

राजप्राप्तये स्तुतविष्णूनां भेकानाम्।

कस्मिंश्चित्कासारे निवसन्तो भेका एकदा समेत्य मन्त्रयां-

चक्रिरे–"नैतद्युक्तं यद्वयं स्वैरं चरामो यथेष्टं कुर्मश्च। यद्यस्माकं कोऽपि स्वामी स्यात्तर्हि समीचीनं भवेत्। यतस्तस्य तन्त्रे वयं वर्तिष्यामहे"। ततः सर्वे मिलित्वा विष्णुं प्रार्थयांचक्रिरे–"भो भगवन्, राजानं देहि" इति। विष्णुरपि तेषां वचोऽङ्गीकृत्य "गृहीतैनम्" इत्याभाष्य दारुखण्डमेकं वियतोऽपातयत्। तस्मिन्पतिते तदाघातेनासमन्ताज्जलमालोडितं महान्शब्दश्चाभूत्। भीतिग्रस्तास्ते तस्मारान्नेयुः। कतिपयैः क्षणैस्तन्निश्चलं बभूव। ततो निश्चेष्टं तद्दृष्ट्वा शनैःशनैस्तदुपजग्मुस्तदारुरुहुस्तेन समं चिक्रीडुश्च। तदा "अचेतनोऽयं राजा नापेक्षितः। अस्मात्साधुतरो राजा याचनीयः" इति मिथः संमन्त्र्य भूयोऽपि विष्णुं तुष्टुवुः। ततो विष्णुः क्रौञ्चं प्रैषिषत्। स आगत एव मण्डूकान्विदार्यात्तुमारेभे। तदा सकलकुलनाशमसहमानाः पुनर्विष्णुं प्रार्थितवन्तः– "इतोऽन्यः कश्चिद्राजा प्रेष्यताम्। नो चेत्पूर्वावस्थाभाजो वयं विधेयाः" इति। विष्णुस्तच्छ्रुत्वोवाच–"नाहमिदानीमेवं करोमि। यो मया प्रथमं दत्तः स वो नारुचत्। अतः स्वापराधस्य फलं भुज्यताम्" इति।

तात्पर्यम्।

यस्यां स्थितौ भगवान्कमपि स्थापयति सा तेन न गर्हणीयान्या च न वाञ्छनीया। वाञ्छिता चेद्यादृशीमामुयात्तादृशीमुपभुञ्ज्यात्। तत्र भगवन्तं नोपालभेत। एकं राजानमप्रियं मत्वान्यमिच्छन्ति, त एव तस्य वशे व्रजन्ति। यदि सोऽर्दयति तर्हि कस्तत्रोपालभ्यः।

कथा चतुर्थी (४)।

मयूरपत्राणि तनावारोहयतो द्रोणकाकस्य ।

कश्चिद्द्रोणकाक आत्मीया नीचाः समागमानर्हाश्चेत्यमंस्त। महत्पदं चाभिललाष । पूर्वोक्तं दृढं संप्रधार्य कानिचिन्मयूरपिच्छानि चिकाय । तानि च स्वपक्षतावारोप्य मयूरवृन्दमविक्षत् । बर्हिणास्तु तं वीक्ष्य काकोऽयमिति ज्ञात्वा समन्ततः परिवव्रुः। प्रथमं तं चञ्चुप्रहारैर्जर्जरीकृत्य तानि पिच्छान्यपहृत्य स्ववृन्दात्तं निरवीवसन् । ईदृशीं कष्टामवस्थामनुभवति निर्वेदमापन्ने स्ववृन्दं विविक्षति तस्मिन्ज्ञातपूर्वचेष्टास्तेऽपि तं न स्वीचक्रुः । तत एकः काकस्तं धिक्कुर्वन्नाह—"रे मूढ, यस्यां जातौ भगवांस्त्वामस्राक्षीत्तां यदि त्वं नात्यक्ष्यस्तर्हीदृशमपमानं किमलप्स्यथाः" ।

तात्पर्यम् ।

ईशो यस्यां स्थितौ निर्मिमीते तां हीनां मत्वा परस्य महत्त्वमभिलिप्सुरेवं विपद्ग्रस्तो भवति। स आत्मीयेषु द्वेषबुद्धिमुत्पादयति । ईदृशः पुमानुभाभ्यामपि वञ्चितो भवति । ये परे ते तं धिक्कृत्योपहसन्ति । निजास्तु जातिद्विडिति तं नाङ्गीकुर्वन्ति ।

कथा पञ्चमी (५)।

जले प्रतिविम्बितस्य शुनः ।

कश्चिच्छ्वा मुखेऽपूपशकलं धृत्वा नद्याः पारं गच्छन्नन्तरात्मनः प्रतिबिम्बं जलेऽपश्यत् । तदा सोऽचिन्तयत्—"यदयमपरः श्वापूपशकलं गृहीत्वा गच्छति" इति। तस्मात्तं शकलं जिघृक्षुर्लोभेन मुखमपावृत्य तदादातुं यावत्प्रवृत्तस्तावत्तन्मुखा-

दपूपशकलमुदके पतितं सत्तलं जगाम । पुनः स तन्न लेभे ।

तात्पर्यम् ।

य ईश्वरेण दत्तेऽर्थे संतोषमनवाप्यान्यस्यार्थं ग्रहीतुमिच्छति तस्येतरस्माल्लाभो न जायत एव । अन्यच्च स्वीयोऽर्थोऽपि नश्यति ।

कथा षष्ठी (६) ।

सिंहपशूनाम् ।

एकदा कैश्चित्पशुभिः सिंहेन सह समयोऽकारि—"यदस्माभिः सर्वैरैकमत्येन वर्तितव्यम्, लब्धमात्रं च समं विभजनीयम्"। एकस्मिन्नहनि सिंहवृकशृगालतरक्षुभिर्मिलित्वैको मृगोऽघानि । शृगालस्तं चतुर्धा विबभाज । तदा सिंहः पुरो भूत्वा तेषामेकं भागमङ्गुल्या निर्दिश्याह—" शृणुत भोः सत्त्वाः, मम भागधेयोऽयमित्येनं विभागमहं गृह्णामि । द्वितीयोऽयमपि मयैव ग्रहीतव्यः । यतो यद्भवद्भिर्विक्रान्तं तन्मदीयेनैव प्रभावेन" । ततस्तृतीयं भागं निर्दिश्य सशिरःकम्पं ब्रूते—"इमं भागमप्यहमाददे । यतोऽहं वो राजा, यूयं च मे प्रकृतयः । अतो भक्तिप्रह्वेण चेतसा यूयमेनं मां दास्यथैव । तुरीयोऽयं भागस्तु मया रक्षणीयः । यतो यूयं जानीथ, विषमोऽयं कालः । सेनापरिग्रहोऽस्माकमदभ्रो धान्यादिभोज्यवस्तुसंग्रहस्त्वल्प इति । यतो नीतिरेवेदृशी यद्भविष्यदापदर्थे सद्य एवोपायः कर्तव्य इति । किमभिमतं वो यदहं वच्मि । नेत्युच्यते चेन्नाहं दोषेण स्पृश्ये । यूयमेव नङ्क्ष्यथेति सम्यग्विचारयत" ।

तात्पर्यम् ।

बलवतां दुर्बलानां च मैत्री न चिरस्थायिनी । बलवन्तः समयकाले शपथं कुर्वन्ति । परं सति प्रसङ्गे समयभङ्गं कर्तुं न विलम्बन्ते । अतो बलवतां सङ्ग एव वाच्यः । एकदा तेषां वशगो भूत्वा तैर्विप्रलब्धः सन्किमेभिरेवं वञ्चयितव्य-मित्यन्यस्याग्रे सविस्मयं पृच्छतीव वाच्या ।

कथा सप्तमी (७) ।

वृकबकयोः ।

कश्चिद्वृको मेषमेकं व्यापाद्याघसत् । तस्यैकमस्थि तस्य गले रुद्धम् । तत आर्तः स उच्चै रटन्वने बभ्राम । यं यं सत्त्वं मार्गे ददर्श तं तमतिकरुणया वाचोदैरयत्—"सौम्य, यदि कृपया गलगतमिदमस्थि निष्कासयसि तर्ह्यनल्पं पारितोषिकं दास्यामि" । तत एको बकः पारितोषिकलोभेन पुरो गत्वाभयशपथं कारयित्वा तदानने स्वां लम्बां ग्रीवां निवेश्य तन्निष्कासयांबभूव । ततो बके पारितोषिकं याचति वृको विस्फारितचक्षुस्तं ब्रवीति—"रे अधम, अदृष्टपूर्वस्त्वत्सदृशो मूर्खः । तव ग्रीवा मे गल आसीत्तां न चर्वित्वा त्वं जीवन्मुक्तः । एतावताप्यसंतुष्टः पारितोषिकं याचसे" ।

तात्पर्यम् ।

केचनैवंविधा अधमाः सन्ति यत्तेषामुपकरणे द्वौ दोषावुपजायेते । एकस्तावदनर्हाणां साहाय्यकरणम् । द्वितीयस्तु तैः संबन्धं कृत्वा विपद उपनयनम् । यत उपकारिष्वप्यपकार-

करणं दुष्टानां स्वभाव एव। एतादृशेभ्यो हानिं विना मोक्षे जाते महाँल्लाभो जात इति ज्ञेयम्।

कथाष्टमी (८)।

जले पश्यन्त्याः शम्बर्याः।

कापि शम्बरी नदीजलं पिबन्त्यम्भसि प्रतिबिम्बितमात्मनो रूपं दृष्ट्वा परं मुदमलब्ध। ततः पादप्रभृति शिरःपर्यन्तं सर्वानवयवानेकैकशो निरूपयन्त्युवाच—"ममाननस्य शोभयित्रेतद्विषाणयुगलं मे शिरसि कियन्मनोहरमस्ति। कथं रुचिरे मे नयने याभ्यां कमलान्यप्यधःक्रियन्ते। कथं मेऽङ्गं कुसुमसदृशम्। यदि मे पादाः शोभना अभविष्यंस्तर्हि रूपवत्त्वे न कोऽपि मामजेष्यत्। परं किं करोमि। एते मे लज्जामावहन्ति। इमे कृशा दुर्दर्शनाश्च विद्यन्ते। एषामभावोऽपि श्रेयान्"। एवं विचिन्तयन्त्यां पादवैरूप्यविषये दुर्मनायमानायां तस्यां व्याधाः समापेतुः। तदागमनं परिज्ञाय सा पलायत। तेऽपि तामन्वसार्षुः। ततस्तान्वञ्चयितुमपथेन गन्तुं प्रवृत्ता सा शाखालग्नाभ्यां शृङ्गाभ्यां रुद्धा सत्यपप्तत्। अनुपदं धावद्भिः संनिकर्षवर्तिभिस्तैरपि सा सद्योऽघानि। तदा सा मनस्युवाच—"कष्टं कष्टम्। ये मे हीनत्वमानयन्तीत्यहमब्रवं तेऽस्मिन्कृच्छ्रे मां ररक्षुः। परं यन्निमित्तो ममाहंकारो जातस्तदेव मे नाशायाभवत्"।

तात्पर्यम्।

स्त्रियः सर्वेष्ववयवेषु न वयं दर्शनीया इति न विषीदेयुः। यथा दुर्दर्शनोऽवयवस्तासां पातिव्रत्यरक्षण उपयुक्तो

भवति तथा न रम्यः । पातिव्रत्यं नाम स्त्रीणां जीवनम् । तस्याभावे मृतकल्पा एव ताः ।

कथा नवमी (९)।

काकजम्बूकयोः ।

कश्चित्काको महान्तं मांसखण्डं मुखेनादायोड्डिड्ये । तुङ्गवृक्षशिखरं च गत्वा निषसाद । एतदुदीक्षमाणः कश्चिज्जम्बूकस्तस्य तरोस्तलमाससाद । कपटेन तत्सौन्दर्यं प्रशंसितुमारेभे—"अरे वयस्य, सत्यमहं ब्रवीमि यत्त्वन्निकाशो रम्योऽण्डजोऽद्ययावन्न मयादर्शि । कथं तव पतत्राणि सुन्दराणि, कथं कोमलानि । किं ते शरीरकान्तिं वर्णयामि । तवावयवसौष्ठवं विस्मृतनिमेषेण चक्षुषावलोकनीयम् । निखिलं तवानुकूलमस्ति । अतस्तव स्वरमाधुर्यमस्त्येवेति तर्कयामि । यदि स स्वरो मधुरः स्यात्कः शक्नोति तव सादृश्यमुदेतुम्" । काक इमां छलस्तुतिं श्रुत्वा कोऽहमिति व्यस्मार्षीत् । ततः कांश्चिद्भावविशेषानभिनीयात्मन्यचिन्तयत्—"अस्य स्वरभ्रान्तिं व्यपोहामि" इति । एवं निश्चित्य गातुमारब्ध । गातुं प्रवृत्तस्यैव तस्य मुखान्मांसखण्डं भूमिमापेदे । तद्गृहीत्वा तन्मौर्ख्यमुपहसञ्जम्बूको यथेष्टं देशं जगाम ।

तात्पर्यम् ।

यः स्तुतिप्रियः संस्तया मुह्यति स वञ्च्यत इति जानन्तोऽपि नरास्तद्वशा भवन्ति । मोहमनाप्नुवन्तो विरलाः । यः प्रशंसितुं न जानाति सोऽफलप्रयत्नो भवतु नाम, परं प्रशंसिता कुशलश्चेदप्रमत्तस्यापि मनो हरेत् । तदप्येवं जायते ।

ये प्रशंसया न मुह्यन्ति तेषां स एव गुणः प्रशंसित्रा वर्णितश्चेत्तान्मोहयति । अत इमं पाशं निराकर्तुमयमेवोपायो दृश्यते, यन्नो गुणानां परीक्षकेणात्मना भाव्यम् । अन्यस्योक्तिं न विश्वसेत् । यदि वयमेव सम्यगात्मनो गुणान्न परीक्षांचक्रमहे तर्ह्यन्य आत्मनो योग्यताविषये किं कथयति । अखिलानां जन्तूनामात्मोपरि प्रीत्युद्रेको वर्तते । आत्मनोऽन्यः श्रेयानिति वक्तुं न कोऽप्युत्सहते । तथैवैकस्य योग्यतामन्यो यथार्थतया न जानाति । एवं सति यो नौति स किमपि प्रयोजनमुद्दिशतीति जानीयात् ।

कथा दशमी (१०) ।

शुन्योः ।

काचित्प्रसवोन्मुखी शुन्यपरां प्रार्थयांचक्रे–"आर्ये, तव मन्दिरं मामेकमासं वस्तुं देहि । प्रसवादूर्ध्वं भवदधीनं करिष्ये" । सा तथेत्युक्त्वा स्ववेश्म गृहोपस्करं बहिर्नीत्वा तन्निघ्नमकरोत् । ततो मासि याते गृहस्वामिनी शुनी प्रसूतां शुनीं सुखं प्रष्टुमागता सप्रश्रयमुवाच–"भवति, अविकलैरवयवैः प्रसूतिवेदना भवत्योत्तीर्णेति तोषमाप्नवम् । अधुना बालकैः सह हिण्डन्तीं बहिश्चरन्तीं भवतीं कदा द्रक्ष्यामीत्युत्कण्ठितं मे चेतः" । तस्या आशयं विदित्वा प्रसूता शुनी तां प्रति बभाषे–"लज्जेऽहं खलु यन्मया भवत्या गेहं बहुकालमध्युषितम् । अनेन मे वासेन भवती बलवदक्लिश्नात् । परं का गतिः मे । शिशवो लघुत्वान्मामनु प्रयातुमशक्ताः । अतः पक्षपर्यन्तं यदि कृपया गेहे वासं दास्यस्युपकृता भवामि । गृहस्वामिनी शालीनतया पक्षावधिकं वासमादि-

क्षत् । पक्षे गतेऽपि सा गृहं नामुचत् । तदा सापरां भूयोऽप्युवाच–"यत्त्वं गृहान्न निर्गच्छसि तत्किं प्रसह्य निर्वासनमिच्छसि । अधुना मे गृहे वास इष्टः" । तच्छ्रुत्वा प्रसूता शुन्याह–"किं त्वं हठान्मां निर्वासयितुमिच्छसि । निर्वासय मां तर्हि यदि शक्नोषि । व्यक्तमहं कथये बलात्कारेणानिर्वासिताहं गेहं त्वदायत्तं नैव करोमि" ।

तात्पर्यम् ।

यस्य हस्ते शशो दृश्यते स एव व्याधत्वेन गृह्यते । एवमपि यस्याधीनं किमपि वस्तु स एव तस्य स्वामी भवति । ईदृश्यां लोकरीत्यां सत्यां यत्कस्यचित्प्रियतमं वस्तु तत्परकरगतमपि मां पुनरेष्यतीति निर्णयाभावे परस्मै स न दद्यात् । ये च धीमन्त उदारास्ते त्यागरूपेणान्यस्मै ददति । परं यो न विश्वसनीयोऽथवा यो वञ्चक इति संदिह्यते तस्मा उपभोगार्थं दानं बुद्धिमान्द्यम् ।

कथैकादशी (११) ।

दर्दुरानडुहोः ।

कस्मिंश्चिदनडुहि शाद्वले चरति सति तत्र कूर्दमानानामल्पकायानां दर्दुराणां मध्य एकस्तस्य पादभारेणाक्रान्तोऽमृत । अपरे दर्दुरा गृहानव्राजिषुस्तत्प्रवृत्तिं मात्रेऽख्यन् । तेऽचक्षिषत–"मातः, अद्ययावदीदृशं महाकायं सत्त्वं वयं नैक्षिष्महि" । तच्छ्रुत्वा दर्दुर्युदरमीषदाध्मायताननुयुयोज–"किमेतावान्स सत्त्व आसीत्" । ते चख्युः–"एतस्मादपि महत्तरोऽभवत्" । भूयोऽप्याध्मातुं प्रवृत्ता साप्राक्षीत्–

"किमेतावान्" । त ऊचुः—"मातः, उदरस्फुटनं यावदाध्मातापि तेन समत्वं नाप्स्यसि"। ततोऽखर्वेण गर्वेणाध्माता सत्युदरं स्फुटित्वा पञ्चत्वं जगाम ।

तात्पर्यम् ।

निर्धनेन स्वसामर्थ्यं सम्यक्परिच्छिद्य व्ययः करणीयः । श्रीमता सार्धं पौरोभाग्यं कर्तुमुद्धतश्चेद्दर्दुरीव नंष्टा ।

कथा द्वादशी (१२) ।

जम्बूकसारसयोः ।

कश्चिज्जम्बूक एकदा सारसं स्वगृहे भोजनाय न्यमन्त्रत । तस्य परिहासकाम्यया चारुस्थाल्यां पायसं निधाय तस्य पुरोऽतिष्ठिपत् । तत्पात्रमुभयतः स्थित्वोभौ भक्षितुं प्रववृताते । परं सारसो दीर्घचञ्चुत्वादायासैरपि पात्रस्थं पायसमास्वादितुमक्षमो बभूव । अत्रान्तरे जम्बूकः सर्वं तद्भक्षयित्वा पात्रं लिलेह । सारसोऽप्यलब्धाभ्यवहारो विलक्षो भूत्वा गृहं वव्राज। तज्जम्बूकस्य कौटिल्यं मनसि संस्थाप्यान्यस्मिन्दिने सारसो जम्बूकमह्वत् । अलिञ्जर आम्ररसं निक्षिप्य तस्याग्रेऽवास्थापयत् । तस्यालिञ्जरस्यातनुतनूदरकण्ठतया जम्बूकस्य मुखप्रवेशस्यानवकाश आसीत् । तदा सारस आत्मनो लम्बां ग्रीवामन्तःप्रवेश्यैवं खादितव्यमिति तस्मै निदर्शयांबभूव । तथा कृत्वोपदेशव्याजेन यथेष्टं रसं पीत्वा तृप्तिमध्यगमत् । प्राशनकाले यदा यदा सारसो ग्रीवां बहिश्चकर्ष तदा ये बिन्दवस्तस्यालिञ्जरस्योपरि पेतुस्ताँल्लेहंलेहं जम्बुकः समाहितो बभूव । परं हृद्यतीव तप्तोऽभूत् । ततो निर्गमकाले स सारसं व्याजहार—"सखे, यत्त्वं चकर्थ तद्यु-

त्कमेव । यथाहमकृषि तथैव त्वमकृथाः । अतो मयात्मा न खेदयितव्यः" ।

तात्पर्यम् ।

परं परिहस्य या मोदानुभूतिः सा सतां न मान्या । य एवं करोति तेनान्यस्य कृतौ विषादो न कार्यः । यथा प्रकृतकथायां जम्बूको व्यधात् । तथाहि, आत्मना दत्ता कूटमुद्रान्येन प्रत्यर्पिता चेत्स्वीकर्तव्या । तदकृत्वा यदि कश्चिदात्मनः परिहासं करोति तं निन्दामः । परं यथा वयमवमानितास्तथा सोऽप्यस्माभिरवमानितोऽभूदिति चित्ते न कुर्मः ।

कथा त्रयोदशी (१३) ।

शिवागरुड्योः ।

काचिद्गरुडी स्वशावकेभ्यः किंचिदाहारार्थमन्विष्यन्त्यनाश्रयं कंचन शिवापाकं ददर्श । तन्नखराभ्यामादायोड्डयमानायां तस्यामदूरस्थिता शिवा ससंभ्रममागत्य करुणस्वरेण सास्राभ्यां नेत्राभ्यां तामनुनिनाय—"भो गरुडि, दीनाहम् । मयि कृपां कुरु । अगतिकाया ममैकमेव वालकं मापहर । मे वालः प्रत्यर्पितश्चेद्वालकदानश्रेयसा संसृज्यसे" । वीतदया सा गरुड्यात्मन्येवमचिन्तयत्—"मम नीडस्तुङ्गशाखिशिखरे विद्यते । तत्रावस्थिताया म इयं वराकी पीडां कर्तुं कथं शक्ता" । अतस्तस्याः प्रार्थनामनादृत्य तं वालं स्वशावकानामग्रे स्थापितवती । तदा सा शिवा संक्रुद्धा सती वैरप्रतीकारोपायं प्रति व्यापृता । तस्मिन्नेव दिवसे समीपपाटीरे ग्रामदेवतातुष्टये खर्वटवासिभिर्नानाविधहव्यैर्हुतमग्निं यदृच्छ-

याल्लोके । तत्रत्यमेकमलातं मुखे गृहीत्वा यस्मिंस्तरौ तस्या गरुड्याः कुलाय आसीत्तस्याध उपतस्थे । समन्ततो घासपुञ्जान्काष्ठानि च संचित्य तत्तरुदाहप्रयोगपरा बभूव । दृष्ट्वैव तद्भीता गरुड्यचिन्तयत्—"शावकैः सहाधुनाहं भस्मसाद्भवामि" इति । ततः प्रतीपं सा शिवां समारराध—"भो- शिवे, अतीवापराद्धं मया । वैरं संहर" । एतावदुक्त्वा सा जीवन्तमेव तस्याः पोतं प्रत्यार्पिपत् ।

तात्पर्यम् ।

वित्ताधिकाराभ्यासुपनीतेन मदेन बलिनो वयमिति मत्वान्येषां घाताय न प्रवर्तनीयम् । महदाश्रयिणो वयम् । यश्च जिघांसितः स दुर्बलोऽस्मान्बाधितुं कदापि न समर्थ इति न मन्तव्यम् । अल्पशक्तिरपि कदा केन प्रकारेण कस्मिन्वा स्थले वैरं निर्यातयतीति निश्चेतुं न शक्यते । सुप्रयोजितस्य वैरस्य शान्तिर्न सुकरा । महान्तमपि नरपतिं छद्मघातका हन्तुं प्रभवन्ति । यो वैरनिर्यातनपरः स आत्मत्यागेनापि येन केन प्रकारेण वैरिणं नाशयति । काचिज्जरतिकापि राज्ञो गृहं वह्निसात्कुर्यात् । दीनो दुर्बलोऽपि प्रभविष्णोः शिशुं हन्यात् । एवं सति ये निष्करुणा लोकानुपप्लवन्ति तैर्दूरदर्शिभिर्भाव्यम् ।

कथा चतुर्दशी (१४) ।

लम्बकर्णवन्यसूकरयोः ।

कस्यांचिदरण्यान्यामेकदा लम्बकर्णशिशुर्वन्यसूकरश्च मिथः समगसाताम् । ततः स लम्बकर्णशिशुः परिहासबुद्ध्या तमुवाच—"भाव, प्रणामस्ते" । तमपूर्वमुपचारं दृष्ट्वा

सूकरो विसिष्मिये । क्रोधवशं गतोऽन्त्राण्यस्य विदार्य बहिर्निष्कासयेयमितीयेष । परं विविच्य स गर्दभमाह—"रे गर्दभापसद, अपसरेतः । यथेप्सितं देशमविलम्बितं गच्छ । रासभस्यास्त्रात्मदंष्ट्रां दूषयितुं नोत्सहे । अन्यथा निमिषार्धेन त्वां हन्याम्" ।

तात्पर्यम् ।

ये विचारशून्यास्ते पण्डितंमन्या भूत्वा महतां परिहासमारभन्ते । यदि पुनस्ते तेभ्यो निराकुला निवर्तन्ते तैर्महाँल्लाभो गणनीयः । मूर्खेण मूर्खैर्भृत्येन भृत्यैर्नीचेन नीचैः सह वर्तितव्यमिति सम्यग्ज्ञात्वा महान्तः कोपायावकाशमदत्वा क्षुद्रस्यैकं द्वौ वापराधौ मर्षयन्ते । एवं दृष्ट्वा नीचा ह्रियं विहाय वारंवारं तथैव न वर्तेरन् ।

कथा पञ्चदशी (१५) ।

वृषभवर्षाभ्वोः ।

द्वावनड्वाहौ सरसीतीरे युध्यमानौ सरोगतेनैकेन वर्षाभ्वा दृष्टौ । ततः स द्वितीयं वर्षाभ्वं भणति—"रे, पश्य पश्य किमिदमग्रे वर्तते । हन्त कास्माकमिदानीं गतिः" । द्वितीयोऽवादीत्—"किमेवं बिभेषि । तयोर्युद्धेनास्माभिः कः संबन्धः । तयोर्जातिर्भिन्ना, रीतिर्भिन्ना, भक्ष्यमपि भिन्नम् । तावस्मानुद्वेजयितुं न युध्येते । अपि त्वहमहमिकयाहमेनं निर्वास्य यूथनाथो भवामीति विवदेते । एवं स्थितेऽस्थाने खलु नौ भीरुपैति" । प्रथमस्तं प्रत्याह—"रे, यत्त्वमवोचस्तत्सर्वमवितथमेव । परं भविष्यद्वृत्तं कथये । तयोरेकोऽन्येन पराजितः प्लायमान इत एवागमिष्यति । तदास्मत्कुलमध्या-

त्केऽपि तत्पादभारेणाक्रान्ता मरिष्यन्ति । तद्विदांकरोतु भवान्कियान्नेदीयान्संबन्धोऽस्ति" इति ।

तात्पर्यम् ।

महतां विवादेषु समीपस्था हीना नश्यन्ति । ये तु महतां पक्षमङ्गीकृत्य पुरःसरा भवन्ति तेऽपि नश्यन्तीति किं वक्तव्यम् । दीना अपि महद्भिः सह विवदेरन्यस्मिन्विवादे सिद्धे बहवः कुशलिनो भवन्ति । परमेतादृशाः पुमांसो विरलाः । ये जनताकुशलं निमित्तीकृत्य विवादमर्थयन्ते ते प्रायः स्वार्थसिध्द्याशंसिनो विद्यन्ते । नहि ते परार्थे विवदन्ते । अपि त्वस्माभी राजसत्ताभाग्भिस्तदुपभोगभुग्भिश्च भाव्यं सर्वेऽस्माननुरुध्येरन्नित्येव हेतोर्विवदन्ते । अधिकारेऽधिष्ठितास्तु प्रजापीडने तत्परा भवन्ति । अतः सद्भिरेतादृशा विवादरता नरो दूरतः परिहर्तव्याः । यदि शक्तिरस्ति तर्हि विवदमानावुभावपि निहत्य लोकपीडा वारणीया ।

कथा षोडशी (१६) ।

द्विभार्यस्य ।

कस्यापि नुर्द्वे भार्ये आस्ताम् । तयोरेका तत्समानवया रूपेणानतिवर्णनीया चासीत् । अपरा तु षोडशवर्षा तरुण्यतीव रूपवती बभूव । सा सौन्दर्यादिभिः कान्तगुणैस्तं परमतूतुषत् । परं सा तस्य पञ्चाशद्वर्षदेशीयत्वात्तेन न तुतोष । तस्य केशाः कियन्तः कृष्णाः कियन्तश्च शुक्लास्तस्य वृद्धभावं सूचयन्ति स्म । अतः परमखिन्ना सा युवतिः कांश्चिच्छुक्लवर्णान्केशान्संवाहनकाले तस्याविदितं तेषां मध्यादुत्पाटयामास । साचिन्तयत्—"अन्तः किमप्यस्तु । परं । बाह्यतस्ता-

वत्स्वपत्युर्वृद्धत्वचिह्नानि लोकेभ्यो गोप्यानि" इति । या ज्यायसी सा त्वेवमचिन्तयत्—"मे पत्युः शुक्लकेशा भूषणस्थानीयाः"इति । अतो यदा तस्याः संवाहनक्रम आजगाम तदा कांश्चित्कृष्णकेशानुत्पाटयामास । एवमुपक्रान्ते षण्मासात्प्रागेव तस्य तपस्विनः शिरः केशविहीनमजनिष्ट ।

तात्पर्यम् ।

यः सारासारं न वेद तस्य प्रसादादपि हानिरुत्पद्यते । याः स्त्रियो भर्तुर्हितैषिण्यस्तदानुकूल्ये च या बद्धाशयास्तास्तस्याज्ञया विना किमपि नाचरेयुः । यदि काचन स्त्री किमपि हितं पश्येत्तर्हि पतिमादौ निवेद्य तत्कुर्यात् । एवं कृत उभावपि कृतिनौ भवेताम् । एष एव स्त्रीधर्मः ।

कथा सप्तदशी (१७) ।

गोष्ठगतस्य शम्बरस्य ।

कश्चिच्छम्बरो व्याधसारमेयैर्निबिडवृक्षसमूहान्निर्वासितो धावन्कस्मिंश्चित्खेटके गोष्ठं विष्ट्वा तृणराशौ निलीय तस्थौ । तद्दृष्ट्वा कश्चिदुक्षा तं वदति—"रे, अत्रागत्य किमारब्धं त्वया । यस्माद्भीत्वा त्वमत्र लीयसे तन्निधनं त्वां सद्य एवागमिष्यतीति मे भाति" । शम्बरस्तानुवाच—"भो मित्राणि, यदि कृपया तूष्णीं क्षणमेकं स्थास्यथ तर्हि जीवितुमाशासे । यथावसरमहमितो निर्गंस्ये" । ततः स शम्बरस्तत्रासंध्यमासीत् । संध्यायां प्रवृत्तायां गोपालास्तृणभारान्गृहीत्वा गोष्ठ आगता अपि तं न लक्षयामासुः । ततो गोष्ठाधिकृतः पुरुष एयाय । तेनापि स न लक्षितः । एवं जाते गुरुः प्रहर्षः शम्बरस्यात्मनि न प्रबभूव । स अनडुह आह—"सखायः,

धन्या यूयं येषां कृपयाहं जीवामि। भवादृशाः परोपकारिणः कुत्रापि न दृश्यन्ते"। तच्छ्रुत्वैकोऽनड्वांस्तमाह—"रे, त्वमस्मात्स्थलादक्लिष्टः स्वस्थानं गच्छ। एतदेव वयमाशास्महे। ईशप्रसादेनास्य गोष्ठस्य स्वामी नायातु। स शतं नयनानि बिभर्ति। तस्मिन्नागतेऽस्मिन्राशौ तव निलीयावस्थानं दुर्घटमिति मन्ये"। इति तस्य वदत एव गोष्ठपतिः कार्यान्तरेण बहिर्गतो गृहमाययौ। गृहमागत एव गोष्ठमियाय। भृत्यान्संतर्ज्य व्याजहार—"रे राम राम, किमित्येतस्यानडुहोऽग्रे घासो नास्ति। नित्यमहं वो निन्दामि तथापि कथं न लज्जध्वम्। रे सोनक सोनक, अस्योक्ष्णोऽग्रे कांश्चिच्छष्पकवलान्निक्षिप। कथमनार्या इमे भृत्याः" इत्यन्यैः प्रकारैश्च निर्दहन्निव क्रोधताम्रया दृशेतस्ततोऽभिदधानो यावत्समुद्धतं परिक्राम्यति निपुणं च निरीक्षते तावत्तृणराशौ निलीनस्य शम्बरस्य शृङ्गे तदालोके पतिते। दृष्ट्वैव "अस्मिंस्तृणराशौ शम्बरः शम्बरः। धावत, प्रहरत" इत्युच्चैर्ववाट। श्रुते च तद्वचसि लगुडहस्ता भृत्या धावित्वा तं शम्बरं क्षणेनैकेन जघ्नुः।

तात्पर्यम्।

गृहकार्यस्य यावतीं चिंतां वयं वहामस्तावतीं भृत्या न वहन्ति। भवतु नाम कथमपीति त उदासते। योऽस्मान्बिभर्ति तस्य हितमेव कुर्वीतेति सेवकस्य धर्मस्तेषां हृदयेऽवकाशं न लभते। तेऽजस्रं स्वार्थबुद्धयो भवंति। यस्मिन्कृत आत्महितं सिध्यति तदेव कुर्वते स्वामिनो हितं नानुलक्षंते। तत्त्वत उन्मार्गगमनेन संपद्धीना जाताः श्रीमन्तो विरलाः।

परं च किंकरवञ्चनादिभिर्मलमल्लकतां प्राप्ताः श्रीमंतो बहवो दृश्यन्ते। अतः स्वामी स्वकार्येष्वप्रमत्तः सन्नोपेक्षेत। केवलं च भृत्येषु न विश्वसेत्।

कथाष्टादशी (१८)।

श्वेहामृगयोः।

कश्चिदीहामृगो बहुभिरुपवासैः कृशो भक्ष्यार्थं भ्रममाणः कस्यांचिज्ज्योत्स्नाधवलायां रात्रौ कस्यचित्कृषीवलस्य गोष्ठे मांसलांगमेकं श्वानं ददर्श। कुशलप्रश्नानंतरं स ईहामृगः श्वानमाह—"भोः श्वन्, रुचिरदेहो दृश्यसे। सत्यं वदामि, त्वमिव पीनशरीरो दर्शनीयाकृतिः कोऽपि श्वाद्ययावन्मया नादर्शि। ब्रूहि म एतत्कारणम्। त्वत्तः शतगुणमपि यते, परं कुक्षिपूरमपि भक्ष्यं न विन्दे"। श्वाह—"भो वृक, यथाहं करोमि तथा त्वं करोषि चेत्सुखी भविष्यसि"। ईहामृगः पप्रच्छ—"भोः श्वन्, किं तद्यत्त्वं कुरुषे"। श्वाह—"नान्यत्किमपि। मत्स्वामिनोऽलिन्दमध्यास्य नक्तं चौरान्प्रति बध्नामि"। वृकोऽवदत्—"सौम्य, एतदहं सर्वभावेन करिष्ये। रे, योऽहं वने भ्राम्यामि, हिमवृष्टी सहे तेन मया छायामाश्रित्य कुक्षिपूरं भक्ष्यं लब्धं चेत्किमन्यदाशास्यम्"। एवं संवदतोस्तयोर्वृकः शुनो गले दामनिर्मितं व्रणमलक्षयत्। तं दृष्ट्वैव स श्वानं पृच्छति—"वयस्य, किमेतत्ते गले दृश्यते"। श्वाह—"आँ न किंचित्। दुश्चेष्टितोऽहं लोकान्दशामीति दिवा सुप्ते रात्रौ सम्यग्रक्षणं भवेदिति च हेतोर्मे स्वामी मां दिवा दाम्ना बध्नाति। सवितर्यस्तं गतेऽहं मुच्ये।

ततोऽहं राजेव स्वैरं व्रजामि । मम भक्ष्यविषयेऽयं क्रमः । मे स्वामी स्वहस्तेनोच्छिष्टं ददाति । अन्येऽपि गृहवासिनो मनुजा मयि दयन्ते । पात्रेष्वपूपादि शिष्टं चेन्मद्विना कमप्यन्यं न गच्छति । अनेन मे पीनत्वम् । अतोऽहं ब्रवीमि, यदि त्वमहमिव करिष्यसि सुखं विन्दस इति" । एतस्मिन्नवसरे वृकोऽपससार । तं चाहूत—"रे, एह्येहि । किमपसरति भवान्" । वृको दूरादेव तमाहूय वदति—"रे, तत्सुखं नाभिलषामि । तेऽक्षय्यमस्तु तत् । निरवरोधतास्ति चेन्मया सार्धं कथां कुरु । त्वमिव बन्धमुपेत्य राजापि भवितुं नाशंसे"।

तात्पर्यम् ।

स्वातन्त्र्ये सति निर्धनता वरम् । न पुनः परवत्त्वे सति महत्पदलाभः । यः परवाञ्जायते तस्य प्रज्ञामहत्ताधीरतादयो गुणा अकिंचित्कराः संपद्यन्ते । तस्य स्वामिनस्तन्त्रे वर्तनं नियतमेव । स स्वामी यदि हीनकर्मसु योजयति तदपि तेनावश्यमङ्गीकर्तव्यम् ।

कथा एकोनविंशी (१९)।

अजापुष्टस्य मेषस्य ।

कस्मिंश्चिदजापुष्टे मेषार्भक एकदा तयाजया समं गच्छति मार्गे कश्चिद्वृकस्तमुवाच—"वत्स, श्रान्तोऽसि त्वम् । नेयं ते माता । तव प्रसूस्तत्र पुरोवर्तिनि यूथे चरति" । मेष-शिशुरुवाच—"यत्त्वं वदसि तत्सत्यम् । परं या मामगति-रिति कतिचिन्मासाञ्जठरे दधार, परं प्रसूतेरूर्ध्वं सद्यो माम-नाथं पृथ्वीतले विसृज्य जगाम तां मातरं यदि वदसि तर्हि

कामं वद । परमहमिमामजामेव मातृस्थाने करोमि । कुतः, यतोऽसौ दीनमनाथं मामङ्गीकृत्य स्तन्येन सुतनिर्विशेषं पुपोष । अन्यैरुपायैश्च गोपयामास" । वृक उवाच–"अरे, या त्वां सुषुवे सा ते वन्द्या । निरतिशयं प्रेम तस्यां ते भाव्यम्" । मेष उवाच–"सा मे जनयित्रीति नाहं वदामि । शुक्लवर्णः कृष्णवर्णो वाहं भविष्यामीति या नावागात्सा मे जननकारणमिति सत्यम् । यदि पुंयोनौ सा मामपातयदयं तस्या उपकार एव । यतोऽहं तूर्णं सौनिकस्य हस्ते पतिष्यामि । पश्य तर्हि या केनापि प्रकारेण मयि नोपचकार तामहमियं मातेति कथं ब्रूयाम्" ।

तात्पर्यम् ।

ये हितकर्तारस्त एव पितरः । केवलं जन्महेतवः पितृस्थाने न गणनीयाः । पितरौ बालाश्चान्योन्यं प्रतिपायुः । यावद्बाला ज्ञानहीनास्तावत्पितरौ ताँल्लालयेतां पुष्णीयातां च । विद्योपार्जनं च कारयेताम् । अतिलालनं परिवर्ज्य विनयाधानं विदध्याताम् । ततो व्यवहारक्षमैस्तैरपि पितरौ संरक्ष्यौ । अयमेवान्योन्यस्य धर्मः । प्रायो बाला धृष्टा भवन्ति । यौवने पितरौ नानुरुध्यन्ते । एवं पितरावप्यनात्मज्ञौ स्तः । तौ पूर्वे वयसि बालाञ्शिक्षयितुं न यतेते । यथाशक्ति भक्ष्यपेयोपभोग्यानि तेभ्यो न दत्तः व्ययार्थमर्थं च । वयं ज्येष्ठा इतिबुद्ध्या यथाकारं कुर्वन्ति । सर्वमेतद्बालाः सहेरन्निति ते मन्यन्ते । तद्दृष्ट्वा बाला अपि मर्यादां जहति । अतः पितृपुत्रैरिष्टास्तैर्मित्रैर्दंपतीभ्यां परस्परस्य हितमेव करणीयम् । एवं कृते प्रेमदार्ढ्यं भवति । प्रेमशून्यं संबन्धित्वं नाममात्रम् ।

कथा विंशी (२०)।

स्वरकार्कश्ये विषीदतो मयूरस्य ।

एकदात्मनः स्वरः कर्कश इति मयूरोऽनल्पं विषसाद । स भगवन्तं नारायणं ययाचे–"भो भगवन्, तारुण्यनिधे, दीनदयालो, सौन्दर्ये केनाप्यनभिभवनीयोऽहं कोकिलेन स्वरविषये पराजीय इति दुःखतरम्। पश्य कोकिले कूजति सर्वोऽपि जीवलोकस्तस्य कूजने कर्णं दत्ते । कूजितुं मुखेऽपावृते मामुपहसन्ति" । तां मयूरप्रार्थनां श्रुत्वा भगवान्वैकुण्ठस्तं समादधाति–"भद्र, यथा स्वरविषये कोकिलं सुखिनं मन्यसे तथा सौन्दर्ये महत्त्वे च त्वमपि" । मयूरो भणति–"भगवन्, यदि स्वरे माधुर्यं नास्ति किं सुधा सौन्दर्येण" । देव उवाच–"अरे, एकैकं प्रत्येको गुणोऽदायि। तुभ्यं सौन्दर्यम्, गरुडाय बलम्, कोकिलाय स्वरमाधुर्यम्, शुकाय मनुष्यवाक्, पारावताय शान्तिरिति । इमे पक्षिणो यथा स्वेन स्वेन गुणेन संतुष्टास्तथा त्वयापि भाव्यम्। नो चेदाशाबद्धो भूत्वात्मानं व्यर्थं खेदयिष्यसि" ।

तात्पर्यम् ।

एकः सर्वगुणसंपन्नो भूयादितीश्वरेच्छा नास्ति । अतो योऽनेकगुणेष्वासक्तो भवति स तेषामप्राप्तौ विषण्णो न भवेत्। वर्तमानगुणाननाद्रियेत। परिश्रमं कृत्वा त एव वृद्धिं प्रापयितव्याः । चित्तसमाधिरेव सर्वगुणसमधिगमफलम्। स एव समाधिर्यावल्लभ्यवस्तुभिरधिगतश्चेदिह यत्सुखं मानुषगम्यं तत्तेन लब्धं भवति ।

कथैकविंशी (२१)।

जम्बूकद्राक्षाफलानाम्।

कश्चिज्जम्बूकः क्षुत्क्षामकण्ठः परिभ्रमन्द्राक्षामण्डपमभ्यैत्। तत्रागत्योर्ध्वं विलोकयता तेन बहवो दर्शनीयाः पक्वफलानां स्तबका लम्बमाना अदर्शिषत। परं च मण्डपस्योच्छ्रिततयैकमपि फलं न विविन्दे। उत्पतंस्तु शश्राम। अन्ततः कियद्दूरं गत्वा पश्चाद्द्राक्षामण्डपे दृष्टिं विधाय भर्त्सनापूर्वमिदमाह—"गृह्णातु नाम कोऽप्येतानि फलानि। अहं त्वपक्वान्यम्लानीति संत्यज्य गच्छामि"।

तात्पर्यम्।

केचन पुरुषा अलभ्यवस्तुनि कमपि दोषमारोप्यात्मनो लघिमानं छादयन्ति।

कथा द्वाविंशी (२२)।

उरगलोहमार्जन्योः।

कश्चिदुरगो व्योकारस्य पण्यशालामुपेत्य खाद्यार्थमितस्ततोऽन्विष्यंस्तत्र लोहमार्जनीमदर्शत्। तां धृत्वा चर्वितुं प्रववृते। तदा लोहमार्जनी तं तर्जयन्त्याह—"भो मूढ, मां मुक्त्वान्यतो याहि। अहं लोहं कालायसं च चर्वामि। मां चर्वतस्तव दतां भङ्ग एव जायते"।

तात्पर्यम्।

शत्रोर्बलाबलं परीक्ष्य तदुपद्रवे मतिः करणीया। यं सर्वे संमानयन्ति, यदुक्तमाचरन्ति, तेन साकं विरोध आत्मनो नाशाय भवति। तथैव प्रज्ञाबलेन यदि महतां कुत्सा विधीयते तर्ह्यात्मनो मौर्ख्यं स्फुटं भवति।

कथा त्रयोविंशी (२३)।

अजशृगालयोः ।

कश्चिच्छृगालः पानीयं पातुं कामपि वापीं गतो जले ममज्ज । तेन बहिर्निर्गन्तुं बहवो यत्ना अकारिषत परं वन्ध्यप्रयत्नो जज्ञे । अत्रान्तरे कोऽप्यजस्तत्रागत्य तमन्वयुजत्—"अपि मधुरं जलम्" । शृगाल उवाच—"मधुरमिति किं वच्मि । केवलं पीयूषमेव । पायंपायं मे वाञ्छा न निवर्तते । न शक्नोम्येतद्धातुम्" । तन्निशम्याजोऽन्तः प्रविवेश । तदैव तस्य दीर्घशृङ्गेषु पदं निधाय शृगालो बहिरगात् । अजस्तु मज्जनोन्मज्जनेऽसकृदनुभूय ममार ।

तात्पर्यम् ।

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति सर्वत्र फलति । यद्यल्लोक आचरति तत्र तत्र स्वार्थानुष्ठानमस्त्येव । परहिताय यतमाना विरलाः । अतो यः कोऽपि प्रलोभयति तस्य सत्यव्रतत्वं सम्यगनिश्चित्य विश्वासं नेयात् ।

कथा चतुर्विंशी (२४)।

भुजंगमग्राम्यपुरुषयोः ।

कश्चिद्ग्राम्यः पुरुषो हेमन्ते निष्कुटे किमपि कर्म कुर्वाणः प्राचीराभ्याशे हिमोद्वेजितं विकलाङ्गं संश्यानं मुहूर्तेन मुहूर्तार्धेन वा म्रियमाणमेकं भुजंगममैक्षिष्ट । तमीक्षित्वा स पुरुषो दयायत्तचित्तो भूत्वा ग्रहमनैषीत् । नीत्वा च चुल्लीसविधे न्यधात् । तत्र वर्तमानः स तापयोगात्कतिभिः पलैर्लब्धसंज्ञः सफूत्कारं तस्य ग्राम्यपुरुषस्य पुत्रदारानुद्दिश्याधावत् । ततो महान्कोलाहलः समजनि । कलकले संप्रवृत्ते स

पुरुषः कुठारहस्तस्तूर्णमेत्यैकेनैव प्रहारेण तं चक्षुःश्रवसं द्विधा चकार। प्रहरन्निदमब्रूत–"रे पापाशय, निधनोन्मुखे त्वयि यस्तुभ्यमसूनदित तस्मै किमिदं प्रतिदानम्। तव मरणं तु युक्तमेव। अपि च मरणादप्यधिकं दण्डं त्वमर्हसि"।

तात्पर्यम्।

यो हितकर्तारं द्वेष्टि तथा चान्नदातारमपकर्तुमुद्युङ्क्ते स कृतघ्नो महान्पापः। तस्य मरणमेव श्रेयः। तस्य मुखावलोकनमपि न कुर्यात्।

कथा पञ्चविंशी (२५)।

प्रसूतिवेदनार्तगिरेः।

कश्चिद्गिरिरार्तस्वरान्मुमोच। तानाकर्ण्य समीपस्थाः केचन दूरस्था अपि नराः समीयुः। तस्योदरात्किमपि महार्हं वस्तु निर्गमिष्यतीति चिराय प्रतीक्षांचक्रिरे। अन्तत एक आखुस्तस्मादुदपतत्।

तात्पर्यम्।

केचन पुरुषाः प्राप्ताधिकारा वयं नैकप्रकारैर्जनताहितं विधास्याम इति महान्तमाटोपं दर्शयन्ति। जना अपि तेषामाटोपं दृष्ट्वा तान्विश्वसन्ति। ते तु प्राप्ताधिकाराः सन्तः स्वार्थं साधयित्वा जनताहितं किमपि नानुतिष्ठन्ति।

कथा षड्विंशी (२६)।

मक्षिकापिपीलिकयोः।

एकदा स्वस्वमहत्त्वविषये मक्षिकापिपीलिकयोर्महान्संघर्षः समपादि। मक्षिका पिपीलिकामवादीत्–" अये, मम मह-

त्वविषये न कोऽपि संदेग्धि । पश्य । यागादिषु यद्वस्तुजातं संचीयते तत्प्रथममहमास्वादे । ततो देवताः । देवमन्दिरेषु यदुत्तमं स्थानं तन्मदीयम् । तत्र यावती मे स्थितिस्तावती न कस्यापि । राजसभां यान्तीं न कोऽपि मां प्रतिबध्नाति । अहं राज्ञोंऽसे निषीदामि । स्वैरमहमायासैर्विना यथेप्सितं भक्षयामि पिबाम्युपभुनज्मि च । एवंविधया मया सहातीव दीना त्वं सादृश्यं कथमीप्ससि" । पिपीलिका निखिलं तद्वचोऽवधार्य प्रत्युवाच–"अये, अपि शृणोषि । महतां गृहेऽभ्यवहारो भूषणं सति निमन्त्रणे । परं लोकैर्धिकृता निःसारितापि त्वं पात्रान्निस्त्रपा सती न निष्क्रामसि । त्वं प्रगल्भं वदसि यदहं राजकुले व्रजामि, राज्ञोंऽसे वसामीति । तत्रापि शृणु । मिथ्यावादोऽयम् । यतोऽहं पूर्वमेकदा धान्यकणानादाय गृहं प्रस्थिता युष्मज्जातीयामेकां यन्नाम ग्रहीतुमपि वाङ् न प्रसरति तादृग्वस्तुनि समासीनां तदास्वादनलोलुपामलुलोकम् । यत्त्वमात्थ देवमन्दिरेऽहं चिरं वसामीति तदप्यवधारय तस्य हेतुम् । न ते गृहम्, न कश्चिदुद्योगः । अतः कालं नेतुं त्वं तत्र वससि । त्वमहमिव निदाघकाले धान्यं न संगृह्णासि । अतो हेमन्ते निरशनेन म्रियसे । वयं तूद्यमिन्योऽतस्तेष्वेव दिवसेषु खाद्यपेयैरुष्णगृहनिवासेन च सुखं जीवामः" ।

तात्पर्यम् ।

उद्यमानां नैकविधत्वं दृश्यते । केचनोद्यमा अफलाः सन्ति । यान्कुर्वाणाः प्रगल्भं भाषमाणाः पुमांसः श्रोतॄनुद्वेजयन्ति। अपरे त्वेवंविधाः सन्ति यत्तेषां कर्ता यत्र यत्र गच्छति

तत्र तत्र प्रियो भवति । कार्यार्थं राजसभां कोऽपि गच्छतु नाम । परं यो निरुद्योगः कालयापनार्थं तत्र गच्छति स तज्जनितगौरवं न वर्णयेत् । ये दम्भार्थं देवतार्चनस्याडम्बरं दर्शयन्ति का तेषां भक्तिः । यो गृहे तुषयुतान्धान्यकणानपि न प्राप्नोति तस्य महद्भिः सार्धं घृतपायसाद्यन्नलाभे किं महत्त्वम् । स एव महान्य उद्यमी स्वहस्तार्जितसंपदं भुनक्ति यश्चालसानवधीरयति । एतादृशो नोपपदैर्विनापि मान्यो भवति ।

कथा सप्तविंशी (२७) ।

वृद्धशुनः ।

कश्चित्कुक्कुरस्तारुण्ये मृगयायां सेवादक्षो भूत्वा स्वामिनं बहुतोषयत् । तदा स्वाम्यपि तं सादरं चुचुम्ब । तं समवीवहत् । स्वादु खाद्यमदात् । गतासु कासुचित्समासु स जीनस्तं यथापूर्वं सेवितुं नाशकत् । एवं स्थितेऽप्येकदा स्वामिनं मृगयादरेणानुसरंस्तत्कालानुगतमृगदंशकानामग्रेसरो भूत्वैकं मृगं पदेऽधार्षीत् । परं दन्तहीनत्वात्स्खलितशिष्टानां दतां चलत्वाच्च दृढं निग्रहीतुं न शशाक । मृगोऽत्रान्तरे स्वमोचनाय यतित्वा पलायिष्ट । तद्दृष्ट्वा तत्स्वामी क्रुधा रक्तापाङ्गो लगुडमुद्यम्य तं प्रहर्तुमभिससार । तं सारमेयो बभाषे—"रे अधम, क्षणं तावदुद्यतं लगुडं प्रतिसंहर । अहं तव चिरंतनो भृत्य इति विदांकुरु । मृगो गत इति न मे दोषः । नोपेक्षितं मया, तस्य ग्रहणे यथाशक्ति यतितम् । परं यत्र मे नास्त्युपायस्तत्र किमहं कुर्वे । इदानीमहं वृद्धः पूर्ववत्त्वां सेवितुमसमर्थश्च यद्येष ते क्रोधहेतुस्तर्हि पूर्वसेवां स्मृत्वा तमपनय" ।

तात्पर्यम् ।

स्वामिनः प्राय एवं कृतघ्ना दृश्यन्ते । यावद्वयं सेवाविधावनलसास्तावदात्मीयतां प्रकटयन्ति । सेवायां शैथिल्ये दृष्टे सद्यो दुर्जनायन्ते । तथाह्यस्मदुपकृताः केचिदधमाः पूर्वकृतानुपकारान्विस्मृत्य ततो वयं नोपकुर्मोऽल्पान्वा कुर्म इति प्रतीपमस्मानपकर्तुं यतन्ते ।

कथाष्टाविंशी (२८) ।

सगदचिल्लस्य ।

कश्चिच्चिल्लश्चिरं रुग्णो मुमूर्षुरभवत् । ततः स आत्मनः पूर्वकर्माणि स्मारंस्मारं साध्वसबद्धवेपथुर्मातरमवदत्—"भो मातः, कैश्चिद्व्रतैर्नियमैरुपवासैरन्यैश्च भक्तिप्रकारैर्देवमनामयं मदर्थं याच" । माता प्रत्यब्रवीत्—"जात, देवः प्रार्थितोऽपि त आरोग्यं दास्यतीति न मे भाति । यतस्त्वं जन्मनः प्रभृति हिंसापरः । अन्यच्च देवताभ्योऽर्पितानां बल्युपहाराणामपहारान्न व्यरंसीः । नापि ते कदाप्यनुशयो जातः । एवं वर्तमाने कथं नामाहं देवं त्वद्गदनिवृत्तयेऽभ्यर्थये" ।

तात्पर्यम् ।

मृत्युसमये "पापोऽहम्,पापकर्माहम्, का मे गतिः स्यात्" इत्येवंविधायाश्चिन्तावशतायाः पूर्वमेव समाहितेन पुंसा भाव्यम् । शक्तिवैक्लव्यात्पापकर्माचरणे यदसामर्थ्यं जायते ततश्च यः पश्चात्तापो भवति सोऽलीकः । पश्चात्तापं विना देवो न क्षमते । यतोऽलीकानुशायिनो देवः क्षमेत चेत्पापनियमनं कथं भवेत् । अत आत्मनोऽन्तः सुखेन भवनीय

इति यो वाञ्छति स पूर्वमेव दुष्कर्माणि दूरतः परिवर्जयेत्।

कथा एकोनत्रिंशी (२९)।

शशमण्डूकानाम् ।

एकदा प्रबलवाते वाति सति तज्जनितक्षोभवशात्समस्तमहीरुहेषु कम्पितेषु सत्सु, भूतलगतशुष्कपत्रेषूत्पतितेषु सत्सु, सर्वासु दिक्षु पांसुच्छन्नासु सतीषु काममपि वृतिमाश्रयन्तः शशाः परमया भीत्येतस्ततो दुद्रुवुः । महतायासेन वृतिमुल्लङ्घ्य प्राणरक्षणपराः प्लायमानाः पुरतो महतीमापगामद्राक्षुः । तदा निर्विण्णमनसोऽन्योन्यमूचुः—" अहो कीदृशीयं विपत्परंपरा । यत्र यत्र व्रजामस्तत्र तत्रास्माननुप्रधावति सा । वरं तर्हि मज्जनं कृत्वा प्राणत्यागः । न पुनरीदृशेषु व्यसनेषु कालयापनम् " । एवं संप्रधार्य सर्वेऽवारं तीरमासेदुः । तत्र बहिर्निर्गतास्तीरे वर्तमाना भेकास्तान्वीक्ष्य जल उत्पेतुस्तले ममज्जुश्च । तदेकेन वृद्धशशेनादर्शि । स तानङ्गुल्या निर्दिश्य सखीनाबभाषे—" भो मित्राणि, भीरखिलानाक्रम्य तिष्ठति । यद्येवं तर्हि किमस्माभिः प्राणास्त्याज्याः । कुतो धैर्यमवलम्ब्यापतितानि दुःखानि सहित्वा व्यसनं प्रत्यभिमुखैर्न भूयते " । तच्छ्रुत्वा सर्वे धैर्यमालम्ब्य तत्रैवावतस्थुः । एवं कृते कतिपयैर्मुहूर्तैर्वात्या शशाम । ते च स्वस्था अभूवन् ।

तात्पर्यम् ।

केचन पुरुषा नानाविधानि साध्वसानि प्रकल्प्य " हा हा कथं भवेत्, का गतिः स्यात् " इति नक्तंदिनं चिन्तयन्तः

कालं नयन्ति । वयमेवाखिलानां दुःखानां भाजनानीति तेषां प्रतिभाति । इतरत्र सर्वे सुखिन इति च मन्यते तैः । परं यांस्ते सुखभाजो मन्यन्ते तेषां दुःखानि यद्युदीक्षेरंस्तर्हि वयमेव कृतिन इति ते मन्येरन् । भगवता विश्वसृजा सुखदुःखयोरंशा यथाभागशः सर्वेभ्यो दीयन्ते ।

कथा त्रिंशी (३०) ।

सिंहमूषिकयोः ।

कश्चित्सिंहो ग्रीष्मसमये वने प्रच्छायशीतले चूततले सुखं सुष्वाप । तत्र बहवो मूषिकास्तमर्दयामासुः । तैरुपद्रुतः प्रबुध्य यावदितस्ततो विलोकयति तावदेकं मूषिकमैक्षिष्ट । तं करे धृत्वा यावद्विदरिषति तावत्स मूषिको दैन्यपरीतः सप्रश्रयमूचे—"भोः स्वामिन्, विक्रान्तस्त्वं मृगाधिपः । अहं तु भवत्पुरतोऽतीव रङ्कः । किं मेऽस्वात्मनः करं दूषयसि । मे प्राणदानमेव स्वाम्यर्हति" । एतानि चान्यानि करुणावचनानि श्रुत्वा सिंहो दयां चक्रे तं चामुचत् । कालेन स एव सिंहो वनेऽटंस्तस्यैव चूतवृक्षस्य निकटे मृगयुप्रसारिते जाले निपपात । तदाखिलसारव्ययेनाप्यात्मानं मोचयितुं न शशाक । ततो निराशो भूत्वोज्जगर्ज । श्रवणपथगतायां तस्यां गर्जनायां पूर्वोपकृतो मूषिको द्रुततरमागत्य जगाद—"राजन्, न भेतव्यं न भेतव्यम् । अयमस्मि किंकरः । स्वस्थ एधि" । एवमुक्त्वा स्वदद्भिर्जालग्रन्थीनाशु चिच्छेद । सिंहं च मोचयामास ।

तात्पर्यम् ।

प्रभूणामल्पैरपि प्रयोजनमस्त्येव । अल्पा अपि महत्कार्यं

साधयन्ति । अतः प्रभव आत्मभुजपालितेषूपजीविषु दयामेव कुर्युः । यतो नीचा अप्युपकुर्वन्ति । वैभवमशाश्वतमिति सिद्धान्तश्चेदखिलैर्ऋजुतया किं न वर्तितव्यम् । अभ्युदये यदि वयं जनानुपकुर्याम तर्हि जना अपि विपद्यस्मानुपकुर्युः । यद्यपि सर्वे कृतज्ञा न भवन्ति तथापि तेषां कश्चिदुत्पद्येत यस्य साहाय्येनास्माकं संकटानि नश्येयुः ।

कथैकत्रिंशी (३१) ।

मूषकेण सिंहकन्यापरिणयस्य ।

पूर्वप्रस्तावे निरूपितः सिंहो जालान्मुक्तः प्रसन्नवदनश्रीको मूषकं जगाद—"भो मूषक, बलवदुपकृतोऽस्मि त्वया । ईप्सितं वृणु । ते दास्यामीति मे निश्चयः" । अनेन गर्वितः स मूषकः "कोऽहम्, का वा मे योग्यता, किं मया याचनीयम्" इत्यविचार्य सिंहं व्यज्ञापयत्—"यतस्तुष्टः स्वामीप्सित वृण्विति वक्ति ततोऽहं निर्भीको याचे' यत्स्वामिनात्मनः कन्या मे दातव्यति" । तद्वच आकर्ण्य सिंहो दुर्मना जातः । परं किं करोति । पूर्वमेव प्रतिश्रुतं तेन । अतः "दत्ता मया ते कन्या" इत्युदीर्य दुहितरमह्वास्त । यौवनमदमन्थरगमनाया आगतायास्तस्या आकस्मिकेन पदाघातेन स मूषकः पञ्चत्वमाप ।

तात्पर्यम् ।

सारासारविवेकशून्यः पुरुषोऽप्राप्यवस्तुनि बद्धस्पृहो निर्वेदेनाक्रम्यते । सारासारविवेकहीनः सम्राडपि निर्वृतिमान्न भवति । साम्राज्येऽपि रङ्कभोग्यानि संकटान्यनुभवति । सारासारविवेकपूर्णास्तु रङ्का अपि संपत्सुखान्युपभुञ्जन्ति ।

सारासारलक्षणं त्विदमेव यत्पुरुषेण "कोऽहम्, का वा मे योग्यता, कथं वा मया वर्तितव्यम्" इति सम्यग्विचारणा विधेया ।

कथा द्वात्रिंशी (३२) ।

काननकाष्ठच्छिदोः ।

कश्चित्काष्ठच्छिदेकदा वन आसीनः समन्ततो विलोक्य परिदेवितुमारेभे । तं विलपन्तं वीक्ष्य तद्वनतरवस्तमप्राक्षुः—"किं तवाभिप्रेतम्" इति । सोऽब्रवीत्—"मम कुठारस्य नालं नास्ति । अतो यद्यनतिदीर्घं काष्ठखण्डं लभेय तर्हि साधुतरं स्यात्" । तदा सर्वे तरवः समेत्य तस्मै कृपया चिञ्चालगुडशकलं ददुः । काष्ठच्छित्तं कुठारे संयोज्य सर्वान्वृक्षान्निर्विशेषं लुलाव । ततः शालवृक्ष इतरानूचे—"भोः सखायः, नान्योऽत्र वाच्यः । स्वयं कृत एवायं नाशः" ।

तात्पर्यम् ।

शत्रौ दयमानो यः कश्चन तत्साचिव्यं करोति स पश्चात्तप्यते । शत्रुषूपकारस्तदपराधक्षमा च पुंसो महिमानमातनोति । अवितथं खल्वेतत् । तथापि यत्कृत्वा रिपुर्बली भूत्वात्मानमेव पीडयितुं यतिष्यते तत्करणं बालिशत्वमेव ।

कथा त्रयस्त्रिंशी (३३) ।

अश्वसारङ्गयोः ।

कश्चिदर्वा सारङ्गश्चैकस्मिन्केदारे नित्यं चरतः । एवं

स्थित एकदा तौ कलहपरौ बभूवतुः । स सारङ्गः शृङ्गबलेन तमर्वन्तं मालाद्बहिर्निरवासयत् । ततः सारङ्गं विनेतुमनाः सोऽर्वा कंचिन्मनुजमाससाद, तत्साहाय्यं च ययाचे । स मनुजस्तस्य पृष्ठे पर्याणमारोप्य मुखे खलीनं दत्त्वा तमारुक्षत् । गतिपरीक्षाविधौ कशयाप्यभिजघान । अर्वता सर्वमेतत्सोढम् । तस्य साहाय्येन च सारङ्गमजैषीत् । पश्चान्मनुजं बभाषे—“ भो मनुज, बलवदुपकृतोऽस्मि । सिद्धं मे समीहितमधुना । पर्याणखलीनेऽपनीय मां गन्तुमनुज्ञातुमर्हसि”। एतन्निशम्य मनुजस्तं बभाण—“भोऽर्वन्, तवैतावानुपयोग इति नाहमज्ञासिषम् । इदानीं दूरत एव ते बन्धनान्मुक्तिः ” ।

तात्पर्यम् ।

यदैकं विनेतुमन्यं प्रति कश्चिच्छरणमुपैति तदा स दृढं विविच्य तत्कुर्यात् । यतो बलिनो ग्रहादवश्यं मुच्य इति निश्चेतुं न कोऽपि समर्थः ।

कथा चतुस्त्रिंशी (३४) ।

ग्राम्यनागरिकमूषिकयोः ।

कश्चिदृजुस्वभावो ग्राम्यो मूषिक आसीत् । तस्य गृह एकदा कश्चनापरो दर्शनीयाकृतिः पीनशरीरो नागरिकमूषिक आयात् । पूर्वसंस्तववशात्स ग्राम्यो मूषिकस्तं परमप्रीत्यातिथिवदुपाचरत् । बिलगतैर्भक्ष्यपेयैः क्षेत्रमध्यादुपानीतैः कोमलगोधूमकणिशैः कलायपुटैः पूर्वसंगृहीतैरपूपशकलैश्च तं संतोषयामास । एवं ग्रामसाध्यैर्बहुभिर्वस्तुभिरुपचरितोऽपि स तुष्टिं नापत् । ततः कालेन स नागरिको ग्राम्यमुवाच—

"तात, यदि भवते रोचते तर्हि विशङ्केन मनसा किंचिदुच्यते मया। तदवहितो भव। कथं भवानस्मिन्मलिने स्थले निवसति। इदमरण्यम्। इतस्ततस्तृणवृक्षव्रततिविषमाद्रिनिर्झरैर्विना न किमपि दृग्गोचरं भवति। अत्रत्येभ्यः पक्षिविरावेभ्यो मानुषशब्दा न किं सुखतराः। अस्मान्निर्जनप्रदेशाद्राजधानी न किं सुखावहा। तर्हि मद्वचनमङ्गीकृत्य नगरं प्रतिष्ठस्व। तत्र भवान्सुखं वत्स्यति। अलं विचार्य। द्रुततरमागम्यताम्। क्षणिकोऽयं संसारः। अत्र लब्ध एकोऽपि मुहूर्त आनन्देन नेतव्यः" इत्येतान्यन्यानि चैवंविधानि तस्य व्यामोहकवचनानि श्रुत्वा स जरठो ग्राम्यमूषिको मुमोह। ततस्तावुभौ नगराय प्रास्थिषाताम्। निशामुखे नगरं विविशतुः। अदूर एव किंचिद्धर्म्यं ददृशतुश्च। तत्र पूर्वदिन एव विवाहमङ्गलं निर्वर्तितमासीत्। तन्मन्दिरं प्रविश्य कोष्ठागारं जग्मतुः। तत्कोष्ठागारं नानाविधभोज्यैः पूर्णममानुषं चासीत्। एवं दृष्ट्वा स ग्राम्यो हृष्टमना बभूव। स नागरिकस्तमुवाच—" भो महत्तर, अस्याः शालाया मध्य उपविशतु भवान्। अहमेकैकशः पदार्थानानयामि। तानास्वाद्य रसभेदः सर्वेषां मह्यं निवेदनीयः "। एवमुक्त्वा नागरिकः प्राघुणिकं प्रत्येकैकं वस्तु फलानि मोदकापूपादीनि च क्रमशोऽदात्। सोऽपि तानादाय नेत्रे निमील्य तानास्वादयन्नास्ते। आस्वादनकाले च "अहह कियत्यस्य माधुरी" इत्युदीरयति स। एवं द्वित्रान्मुहूर्तान्यापयित्वा यावदवलोकयतस्तावत्कश्चित्पुरुषस्तत्रागत्य कोष्ठागारस्य द्वारमुदघाटयत। ततः संभ्रमेणोभावपि कोणे निलिल्यतुः। एतस्मिन्नेव काले

द्वौ स्थूलवपुषावोतू तत्रागमताम् । उच्चै रुरुवतुश्च । तं विडालशब्दं श्रुत्वा ग्राम्यस्य हृदयं भयकम्प आक्रमत । स मन्दं तं नागरिकं प्रावोचत्–"भो नागरिक, यद्येवंविधं ते सुखं तत्तुभ्यमक्षय्यमस्तु । ग्राम एव मे श्रेयान्। तत्र गताः क्षेत्रोद्धृताः शिम्बिका वरम्, न चात्रत्यं सोद्वेगमपूपमण्डकास्वादनम्" ।

तात्पर्यम् ।

व्ययभोगपर्याप्तधनवत्त्वे निराबाधत्वे च ग्रामवासोऽपि गरीयान् । नैकविधाधिव्याधिपरिगतो भोगविलासैरप्युपेतो नगरवासोऽकिंचित्करः । कोऽप्याशङ्केत–" एवं सुखप्रदे ग्रामवासे किमिति लोका नगरवासमङ्गीकुर्वन्ति " । तद्धेतुं शृणुत । नगरवासमूलान्यनेकानि भवन्ति । केचिद्राजसेवार्थम् , अन्ये वाणिज्यार्थम् , अन्ये गुणिजनसमागमार्थं च नगरे वसन्ति । अन्ये तु पूर्वजानुरोधेन सुहृदनुरोधेन च नगरे वासं रचयन्ति । नगरं हि संपदागमस्थानम् । अतः केचिद्विद्वांसो नगरवासं हितं मन्यन्ते । ते वाञ्छन्ति–"इयत्परिमाणं द्युम्नं संचितं चेत्स्वग्रामं गत्वा सुखं निवसामः" इति । अन्ये केचिद्यावज्जीवं दीर्घायासैर्धनमुपार्जयन्ति । इच्छन्ति च–" वार्धके नगरं हित्वा कस्मिंश्चिन्नदीतीरे पुण्यग्राम आयुःशेषं नयामः" इति । एवं च नगरवासिषु न कोऽपि लभ्यते यो ग्रामवासं नाभिकाङ्क्षति । पुराणैर्महासूरिभिरप्युच्यते यन्मनःशान्तये पुण्यकर्माचरणायानामयोपभुक्तये च विजनवास एव साधीयान् । नान्यत्साधनम् ।

कथा पञ्चत्रिंशी (३५)।

पल्लीखनकयोः।

केनचित्प्रायोपवेशितेन कृशेनाधोगन्त्रा कुशूलैकप्रदेशे छिद्रं कृत्वा तदवेशि। तत्र यथेष्टधान्यलाभात्स्वल्पैरेवाहोभिर्हृष्टपुष्टाङ्गोऽभवत्। एकदा स बहिर्निर्गन्तुं येते। परं तु तस्य पीनशरीरं तस्मादल्पच्छिद्राद्बहिर्नाययौ। तद्दृष्ट्वारादभिवर्तमानयैकया पल्ल्याभिहितम्—"भोः सुहृत्, एतस्मात्स्थलान्मोचयितुकामश्चेद्भवानेक एवोपायोऽस्ति। पूर्ववत्कृशो भव। कार्श्ये धृते दिष्टचात्मानं मोक्ष्यसि। नान्यथा"।

तात्पर्यम्।

यो दारिद्र्यात्संपन्नत्वं याति स प्रायो दारिद्र्योपभोग्यानि सुखानि नाश्नुते। दारिद्र्येऽपि कानिचित्सुखानि सन्ति यानि श्रीमत्त्वे नैवोपलभ्यन्ते। श्रीमन्तोऽनेकैरुपाधिभिरावृतास्तिष्ठन्ति। यस्य त उपाधयोऽनभिमतास्तेन श्रीरपि त्याज्या। अयमेव सुखोपलब्धिमार्गो नान्यः।

कथा षट्त्रिंशी (३६)।

उदरावयवानाम्।

एकदा हस्तपादाद्यवयवा अचिचिन्तन्। यद्वयं श्राम्यामः संगृह्णीमश्च। किं तर्हीदमुदरमायासानकृत्वा सुखं खादति। यदद्ययावज्जातं तदस्तु नाम। अद्यप्रभृतीदं श्रमित्वात्मनो भर्म कुर्यात्। नास्माकमनेन प्रयोजनम्। एवं सशपथं सर्वे निश्चिक्युः। हस्तावूचतुः—"यद्यस्योदरस्यार्थेऽङ्गुलिमपि चालयेव, त्रुट्यन्तु नोऽखिलाङ्गुलयः"। मुखमुवाच—" अहं

शपथं करोमि । यद्यस्यार्थं एकं ग्रासमपि गृह्णामि कृमय आक्रामन्तु माम्" । दन्ता ऊचुः—"यद्यस्य कृते ग्रासं चर्वामः, भङ्ग उपैत्वस्मान्" । एवं शपथेषु कृतेषु यो निश्चयोऽकारि तस्य पालनमावश्यकं बभूव । एवं जाते सर्वेऽवयवा अशुष्यन् । अस्थिचर्ममात्रमवाशिनष्ट । तदा "न साधुकृतमस्माभिः" इति सर्वेषां चक्षुषी उन्मीलिते । उदरेण विना वयमगतिकाः । तत्स्वयं न श्राम्यति परं यावद्वयं तस्य पोषं विदध्मस्तावदस्मादस्माकं पोषणं भवतीति सर्वे सम्यगज्ञासिषुः।

तात्पर्यम् ।

कस्मिंश्चित्काल एकस्यां राजधान्यां चिरयुद्धप्रसङ्गाद्राज्ञः कोशागारे द्युम्नसंकोचे समुत्पन्ने स राजा प्रजाभ्यो बलिमग्रहीत् । तत्प्रजा नाभ्यमंसत । ता उपद्रवोऽयमिति गणयित्वा नगराद्बहिरावासमरीरचन् । तत्र वर्तमानाभिस्ताभिः संहतिः कृता । ता मिथोऽमन्त्रयन्त—"वयं क्लिश्नीमः । राजा त्वस्मत्किमिति मुधा गृह्णाति । अतःपरं न वयं राज्ञे किमपि दास्यामः" इति सर्वा निश्चिक्युः । तेषामेतं निर्णयं संप्रधार्य राजात्मनोऽमात्यं तान्प्रति प्रैषिषत् । सोऽमात्यः प्रजाभ्य उदरावयवानामेनां कथां निवेद्य तासामानुकूल्यं प्रापत् । राजा प्रजाश्च सुखमन्वभूवन् । यदि वयं राज्ञे भागधेयं न दद्याम तस्य व्ययोपयोगाय धनं न शिष्यते । एवं समापतिते तस्करा बद्धपरिकरा दिवापि लुण्ठनं विधास्यन्ति । एकोऽन्यं नानुरोत्स्यते मर्यादातिक्रमः प्रमाथाश्च भूत्वा राजा प्रजाश्च सममेव नङ्क्ष्यन्ति ।

कथा सप्तत्रिंशी (३७)।

टिट्टिभीशावकानाम् ।

काचिट्टिट्टिभ्येकस्मिन्क्षेत्रे नीडं कृत्वोवास । यदा तत्क्षेत्रं पक्वमभूत्तदा सा चिन्तयाक्रम्यत । साह—"मे शावका नातिपरिस्फुटपक्षाः । यद्यस्य क्षेत्रस्य स्वाम्युड्डयनाक्षमेष्वेषु सस्यलवनं कारयेत्का मे गतिर्भवेत्" । ततः प्रभृति प्रत्यहं यदा साहारसंचयनाय बहिर्जगाम तदा सा शावकानादिक्षत्—"मम परोक्षे यद्यत्कोऽप्यत्रागत्य वदति तत्सर्वं गृहं प्रत्यागतायै मह्यमाख्यातव्यं युष्माभिः"इति । कदाचित्तस्य क्षेत्रस्य स्वामी पुत्रद्वितीयः क्षेत्रमायाय तमभिदधे—"पुत्र, लवनयोग्यमिदं क्षेत्रम् । याहि । श्वः प्रातरस्य लवने सहाया भवितुमर्हथेतीष्टाप्तजनान्विज्ञापय" । एतत्ते शावकाः प्रत्यागतायै मात्रे यथावन्निवेदयामासुः । सकिलकिलं तां परिवृत्य "झटिति नयास्मानितोऽन्यत्स्थलम्" इति ययाचिरे । मातोवाच—"बालाः, स्वस्थाः स्त । यथा क्षेत्रस्वामी सस्यलवनविषये प्रातिवेश्येष्विष्टाप्तेषु च विश्वसिति तथाहं दृढं जाने सस्यलवनं श्वो न भविता" इति । अन्येद्युर्यदा सा बहिर्जगाम तदा पूर्ववत्तानादिदेश । अतस्ते क्षेत्रपतेरुक्तिं प्रति बद्धावधानास्तस्थुः । स क्षेत्रमागम्याहूतानपेक्षांचक्रे परं कोऽपि नायात् । अन्यच्च मध्यमहः सवितारूढः । अतः स सूनुमचकथत्—"पुत्रक, इष्टाप्तप्रातिवेश्येषु विश्वासो न कार्यः । याहि तर्हि । श्व आत्मनो बन्धुवर्गं विज्ञापय भवन्तः सस्यसंचयेऽवश्यं साहाय्यं कर्तुमर्हथ" इति । तच्छ्रुत्वा शावका अतीव बिभ्युः । आगताया एव जनन्यै यथाश्रुतं न्यवीव-

दन् । तदा सोवाच—"अर्भकाः, यद्येवं मा भैष्ट । यतो बन्धुवर्गः स्वजनस्य हितं प्रति जागरूकः कार्यं करिष्यतीति मिथ्यैव । श्वः किल यद्ब्रवीति तत्समाहिताः शृणुत, मह्यं च निवेदयत" इति । अपरेद्युरपि स्वामी तत्रागत्य बन्धुजनांश्चिरं प्रतिपालयामास । तेऽपि नाययुः । तदा स पुत्रमाह—"भीमक, गच्छाधुना । श्वो द्वे लवित्रे तेजिते कुरु । आवामेव सस्यं लुनाव" । इमां वार्तां शावकाः प्रसुवे न्यवेदयन् । एतदाकर्ण्य साह—"डिम्भाः, अधुनात्रास्माकं वासो नोचितः । यतो यः स्वयं किमपि कर्माङ्गीकरोति स प्रायस्तस्यान्तं यायात्" । ततः सा शावकान्सद्योऽन्यत्र निनाय । अपरेऽहनि स स्वामी सपुत्र आगत्य सस्यलवनं व्यधात् ।

तात्पर्यम् ।

यत्कर्म कर्तुं वयं शक्नुमस्तद्विषय इष्टाप्तसुहृत्सु न विश्वस्यात् । यस्तेषु विश्वसिति तस्य द्विधा हानिर्जायते । एकस्तावन्मूर्ख इव तेषां प्रतिपालनम्, कार्ये प्रत्यनारम्भश्च । द्वितीयस्तावद्वञ्चितत्वादुद्वेगः । य आत्मकार्ये आत्मन्येव विश्वसिति तस्यासंशयं कार्यं सिध्यति । असिद्धे मनस उद्वेगो नोत्पद्यते । यतः स निपुणं जानाति न मया तत्सिद्धिप्रयत्न उपेक्षितम् । यत्ने कृते यदि न सिद्धं कार्यं न मे दोष इति ।

कथाष्टत्रिंशी (३८) ।

वृकोपमात्रोः ।

कदाचिद्रात्रावेको डिम्भो मुक्तकण्ठं रुदन्नोपरराम । तं

स्नापयितुं सोपमाता बहुभिः प्रकारैरयतिष्ट। परं स क्रन्दनान्न व्यरंसीत्। अन्ततः सा तमुवाच—"रे यदि रोदनं न मुञ्चसि तर्हि द्वारि स्थितस्य वृकस्य हस्ते त्वां प्रापयामि"। अस्य वचस उक्तिवेलायां कश्चिद्वृकस्तत्र तत्त्वतः समापपात। स एतच्छ्रुत्वेयं यथोक्तमाचरिष्यतीति बुद्ध्वा चिरमतिष्ठत्। रुदता तेनार्भकेण श्रान्तेन निरवेशि निद्रासुखम्। वृकस्तु क्षुधा बाधितो वनं निववृते। मार्गे गच्छन्स शृगालेन कुशलं पृष्टः। शृगालोऽवदत्—"माम, कथमद्य ते पादा न प्रचलन्ति"। वृक आह—"मित्र, मा पृच्छ। मूर्खोऽहं तस्या दुग्धधात्र्या वचनेन विप्रलब्धोऽस्मि"।

तात्पर्यम्।

केचन सूरयो न कस्य वचसि प्रतीयादित्युपसंहृत्य स्त्रीविषयकमेतद्वाक्यमित्युदाहरन्ति। परं न तद्युक्तम्। प्रायशोऽबलाः स्वभावचञ्चलाः सन्ति, निरर्गलं च भाषन्ते। परंतु यथोक्तमनुतिष्ठन्त्योऽपि बहवो विद्यन्ते। इदमेवास्याः कथायास्तात्पर्यं यत्स्त्रियः पुंसो वा वचसि न विश्रम्भः करणीयः। यद्ब्रुवन्ति तद्विश्वासयोग्यं न वेति विविच्य वर्तनं विधेयम्।

कथा नवत्रिंशी (३९)।

कूर्मगरुडयोः।

कश्चित्कूर्मो भूमौ गतागतैर्निर्वेदं प्रपेदे। विहायोविहारी भूत्वेतस्ततः सृष्टिचमत्काराणां कियद्रामणीयकं तद्द्रष्टव्यमिति तस्य मनस्युदपादीच्छा। स सर्वान्पक्षिणोऽभाषिष्ट—"यो मां

वियत्पथा नेष्यति, सृष्टिसौन्दर्यं च दर्शयिष्यति, तस्मा अहं भूगर्भान्तर्गता मया ज्ञाता रत्नखनीर्दर्शयिष्यामि" । श्रुत्वैतत्तार्क्ष्यः कच्छं खं नीत्वा भूगोलवर्तिनोऽखिलांश्चमत्कारानदर्शत् । ततः कच्छमुवाच—"भोः, कुत्रेदानीं ते रत्नाकराः । दर्शय तूर्णम्" । तदा कच्छो भ्रान्तचित्तवद्व्यवहर्तुं प्रावर्तिष्ट । तदुदीक्ष्य खगेश्वरश्चुक्रोध । तस्य मर्मसु च नखरं व्यापार्य तमहन् ।

तात्पर्यम् ।

यदि प्रतिज्ञा नोत्तीर्यते तर्हि हानिर्जायते । ये महान्तस्ते मानभङ्गमाप्नुवन्ति । ये साधारणास्ते मानभङ्गं प्राप्य शरीरपीडामनुभवन्ति । यस्तु केवलं मिथ्याभाषी परवञ्चकः स सर्वस्वं हारयित्वा प्राणानपि जहाति ।

कथा चत्वारिंशी (४०) ।

सूर्यहिमवाय्वोः ।

एकदा सूर्यहिमवायू मम शक्तिरधिका मम शक्तिरधिकेति विवदितुमारेभाते । अत्रान्तरे कम्बलवान्कश्चित्पान्थस्तेन पथा गच्छन्नुभाभ्यां ददृशे । तं दृष्ट्वोभावपि सममन्येताम्—"योऽस्य कम्बलमासयति स एव श्रेष्ठः" इति । तत्रादौ हिमवायुरग्रेसरोऽभूत् । स यथा यथा कम्बलमासयितुं प्रबलं वातुं प्रावृतत्तथा तथा स पान्थोऽधिकं स्वकम्बलेन शरीरं प्रावृणोत् । ततो वायुः शश्राम । पूषाग्रतोऽभवत् । स प्रथमं नभसि विकीर्णानि हिमजनकानि सर्वाण्यभ्राणि व्यलिनात् । हिमं च निरास्थत् । ततः शनैरात्मनश्चण्डकिरणांस्तस्य शरीरे युयोज । अनेन सोऽल्पेनैव कालेनोष्मणा

विह्वलो भूत्वा कम्बलं तत्याज । निकटवर्तिन्यां वृक्षवाटिकायां शीतलच्छायां भेजे ।

तात्पर्यम् ।

मनुजमात्रस्य प्रकृतौ बीजरूपेण किमपि धाता निरमास्त । यद्वशात्स परस्य बलात्कारासहिष्णुर्भूतः । अत एव यथा यथा किमपि हठादन्येन कारयितुं यतामहे तथा तथा तदकरणे तस्य बुद्धिर्दृढा भवति । यथा कटूक्तयः सद्धृदयं संहत्य दुराग्रहवत्कुर्वन्ति, तथा चाटूक्तयः शान्त आचारश्च तदार्द्रीकृत्योपदेशश्रवणानुकूलं विदधति । चिराभ्यासेन यत्किमपि मनुजो बलवदङ्गीकरोति तत्त्याजने बलात्कारं यदि कुर्वीमहि तर्हि प्राणव्ययेनापि तस्य समर्थनेऽभिमान उत्पद्यते । इदमेवात्र सारं हिमवायुरिव यो विरुद्ध उपचारः स नरं स्वमतं दृढं प्रतिपादयितुं प्रोत्साहयति । यश्च सवितेवानुग्रमपि कार्यसाधकमुपायं बुद्धिविलासेन योजयति स एव समीहितं साधयति ।

कथैकचत्वारिंशी (४१) ।

सिंहवेषधारिणो रासभस्य ।

कश्चिद्रासभः सिंहचर्मालब्ध । तेन गृहीतेनात्मनः शरीरमाववार । ततःप्रभृति यदा यदा स वनेषु गोचारणक्षेत्रेषु चाभ्रमीत्तदा तदा सर्वे सत्त्वास्तस्माद्भीत्वा विदुद्रुवुः । एकदा स स्वामिना यदृच्छया संजग्मे । तमपि भाययितुं स येते । ततस्तस्य लम्बौ कर्णौ निरीक्ष्यायं मम रासभ इति तेन सद्यो जज्ञे । तत एकं दीर्घं लगुडं गृहीत्वा तं विनिनाय ।

तं च ज्ञापयामास—"यद्यपि त्वं सिंहचर्म पर्यदधास्तथापि त्वं रासभ एवेत्यहं दृढं जानामि" इति ।

तात्पर्यम् ।

यः कोऽपि योग्यतां विना शौर्यस्य च कोविदत्वस्य च सत्त्वस्य चाविर्भावं दर्शयति स हीनोऽज्ञानेव वञ्चयति। परं यदि स ज्ञातृभिः संगच्छते तदा तं तत्त्वतः परिज्ञाय त उपहसन्ति ।

कथा द्वाचत्वारिंशी (४२) ।

मण्डूकशृगालयोः ।

कश्चिद्वाचाटो नाम मण्डूक एकदा सरसो निष्क्रम्योच्चैः स्थलमध्यासांचक्रे । तत्रस्थस्तारस्वरेण सर्वान्वनपशूनाकार्य वदति—"भोः सत्त्वाः, शृणुत । अहं कुशलो भिषगस्मि । गदमात्रस्यापोहने प्रभवामि" इति । एतावदुक्त्वात्मनो नैपुण्यं प्रकटयितुमायुर्वेदाद्वैद्यशास्त्रेभ्यो वचनान्युज्जगार । वन्यपशवस्तेषामभिधेयं नाज्ञासिषुः । परमयं कोऽपि महांश्चिकित्सक इति तेषामभात् । अतो यद्यत्स निजगाद तत्सर्वं तेषां संमतमभूत् । तत्र कोऽपि क्रोष्टासीत् । स एतन्न सेहे । स भर्त्सयन्मण्डूकमाह—"रे पामर, ते मुखं संकुचितम् । किलासीकृतं ते वपुर्निस्तेजस्कं च । स त्वमन्येषां रोगान्दूरीकरोमीति वक्तुं किं न लज्जसे" ।

तात्पर्यम् ।

य आत्मनो दोषान्दूरीकर्तुं न शक्नोति सोऽन्यस्य दोषान्विप्रकर्षुं न यतेत । योऽन्यमुपदिशति स तथाचरेद्यथास्या-

चरणे न कोऽपि संदिह्यात् । एवं सति तस्योपदेशो मान्यो भवति । यो दोषोऽन्यैस्त्याज्य इति वयं लोक उपदिशामस्तेन दोषेण वयमेव लिप्यामहे यदि तर्हि कथं स उपदेशो मान्यो भवेत् । वयं चोपहास्याः कथं न भवेम ।

कथा त्रयश्चत्वारिंशी (४३) ।

क्षतिकरणशीलस्य शुनः ।

कश्चिच्छ्वा जनानभिधावति तान्दशति च । अस्य हेतोस्तस्य स्वामी तस्य गले काष्ठमेकं बबन्ध । एतन्महद्भूषणमिति स श्वा मत्वा प्रातिलेश्याञ्शुनस्तिरश्चकार । तान्संनिधौ स्थातुमपि न ददौ । ततस्तेषु कश्चिद्वृद्धस्तं ब्रूते—"तात, गलस्थितेनानेनाहं महत्त्वं प्राप्त इति मन्यसे चेत्सुखं मन्यस्व । परं य एनं गलेऽभान्त्सीत्तेन महिम्नः कारणमिति नेदं काष्ठं बद्धम् । अपि तु लघिम्नः कारणमिति बद्धमित्यहं तर्कये"।

तात्पर्यम् ।

केचिद्दोषवन्त एवं साभिमानाः क्षुद्रबुद्धयो वर्तन्ते यत्तेष्वीश्वरेण प्रायः किमप्यभिज्ञानचिह्नं स्थापितमस्ति । आत्मनि संस्थितं वैकल्यं ते यथाभिलषितं समर्थयन्तः श्रेष्ठत्वमात्मन्यापादयन्ति । यः सदसि सम्यग्वक्तुं न शक्नोति, यद्भाषिते च जना हसन्ति, स वदति—"विशाला मे बुद्धिः । सपद्यनेका भावना मन आविशन्ति तस्मादिदं भवति" । मूर्ख इति अशिक्षित इति सोपहासं जना यं परिहरन्ति स वक्ति—"ममानुभावोऽसह्यः अतो न कोऽपि मामभ्येति" ।

ईदृशा नरा विचार्यालोचयन्ति चेत्तेषां हितं भवेत् ।

कथा चतुश्चत्वारिंशी (४४) ।

आदित्यक्रमेलकयोः ।

एकदा कश्चित्क्रमेलक आदित्यं सप्रश्रयं याचितवान्—"भो आदित्य, यथा गोमहिषादयः शृङ्गिणः कृता भवता, तथा किमहं न क्रिये । विषाणैराप्तैरहं शत्रुभ्यस्त्राणं विधास्यामि । एतां मे विज्ञप्तिं श्रोतुमर्हति देवः" । तं भगवानादित्यो वदति—"रे मूढ, यन्मया तुभ्यं दत्तं तदलं विचार्यैव दत्तम् । तेन संतुष्टेन त्वया भाव्यम् । तदकृत्वा यदन्यस्मै दत्तं तत्पुरस्कृत्य तद्याचसे । अस्य धृष्टत्वस्य दण्डं तर्ह्यामुहि । तव कर्णौ ह्रस्वौ भविष्यतस्त्वं चातिभारवाहको भविष्यसि" ।

तात्पर्यम् ।

अस्मिञ्जगतीशेन यद्यद्दत्तं तत्तदुपपन्नमेव । ये तदन्यथा कर्तुं यतन्ते तेऽसमीक्ष्यकारिणो मूढा इति वक्तव्यम् । ईदृशानामुद्यमा निष्फला भवन्ति । अपि च ते दुःखभाजो भवन्ति।

कथा पञ्चचत्वारिंशी (४५) ।

कयोश्चित्पान्थयोः ।

कौचित्पान्थौ देशान्तरं प्रतस्थाते । ते सशपथं सभयं चक्रुर्यद्वर्त्मनि संकट आपतितेऽन्योन्यस्य व्यभिचारो माभूदिति । तत एकस्मिन्गहने गच्छतोस्तयोः कश्चिदृक्षस्तौ प्र-

त्यभिससार। तदा तयोरेकश्चपलाङ्गः कृशोऽविलम्बितं विद्रुतो वृक्षमारुरोह। अन्यः स्थूलत्वाद्द्रुतगमनाक्षमः प्राणानायम्य विगतचेष्टो भूमौ सुष्वाप। स ऋक्षस्तत्रागत्य कर्णं आघ्राय शवोऽयमिति मत्वा पीडामकृत्वा निववृते। ऋक्षे निर्गते वृक्षमारूढः पुरुषः शनैरवतीर्य सस्मितं भाषते—"सौम्य, स ऋक्षः कर्णे किं त्वां कथयामास। यतोऽहं वृक्षगतः स ऋक्षः किमपि कर्णे त्वां मन्त्रयांचक्र इत्यदर्शम्"। स प्रतिबभाषे—"स ऋक्षस्त्वादृशेषु शठेषु विश्वासं मा कुर्विति मामादिदेश"।

तात्पर्यम्।

यदा प्रयोजनं नास्ति तदा बहवो लोभं दर्शयन्ति विश्रम्भार्हाणि च वचांसि भाषन्ते। परं तेषु विषमे तिष्ठन्पुरुषो विरलः। यो लोकरीतिं वेद स ईदृशेषु वचनेषु न विश्वसिति। मुधा कोऽपि न भाषेत। श्रोत्रापि वचनमात्रे विश्वासो न कार्यः। तस्मिन्नुभयोरपि हानिर्भवति।

कथा षट्चत्वारिंशी (४६)।

केशहीनस्य सादिनः।

कस्य चित्सादिनो वयोधर्मेण केशा नष्टाः स मुण्डोऽभवत्। एनं वैकल्यं ह्नोतुं स उपकेशं बिभरांचकार। एकदा मृगयादरेण गतस्य तस्य सहसा प्रबलवातेन स उपकेशो ध्मातो भूमिं प्रपेदे। तदासन्नवर्तिनः सहायाः सावमानं जहसुः। दृष्ट्वैतत्स साद्यपि जहास, उवाच च—"मे केशा अपि शिरसि नावाशिंषन्कथं तर्हि मे परकीयाः शिंष्युः"।

तात्पर्यम् ।

कलहपरा आत्मन इतरेभ्यश्च न सुखं ददति । न्यूनताविरहिता न केऽपि सन्ति । परं यः कलिमुत्पादयंश्छिद्रमन्विष्यन्नन्येषु दोषारोपं करोति स सर्वेषामप्रियो भवति । अयं दोषः सर्वगुणान्मज्जयति । अतो यश्चित्तस्वास्थ्यं जनानां प्रीतिसंपादनं चेच्छति स कलहनिमित्तं नान्विष्यति । निमित्ते दृष्टेऽलक्ष्यं करोति । यल्लक्ष्यगतं तत्परिहासबुद्ध्या गृह्णाति । केचिज्जना अन्यस्य दोषं प्रकटयन्ति । ततो यथा यथा स तप्यते तथा तथा ते संतोषं प्राप्नुवन्ति । तं मर्मच्छिद्भिर्वचनैरधिकमभियुञ्जते । ईदृशानां दुष्टाशयानामभिभवायायमेवोपायो दृश्यते । यदस्माभिरसंजातामर्षैस्तेषामुक्तेः परिहासः कार्यः कदाचिदन्यस्योपहासात्पूर्वमात्मनः परिहास आरम्भणीयः ।

कथा सप्तचत्वारिंशी (४७) ।

पात्रयोः ।

मृत्पात्रं रीतिपात्रं च नद्यास्तीर आस्ताम् । ऊर्ध्वप्रदेशादागतेन पूरेणोह्यमानयोस्तयोर्मृत्पात्रं चिन्तापरं बभूव—"रीतिपात्राभिघाते संवृत्तेऽहं भङ्क्ष्यामि" इति । दुःखितं तद्दृष्ट्वा रीतिपात्रं तदुवाच—"भोः, मा बिभीहि । अहं त्वां रक्षिष्यामि" इति । मृत्पात्रं तदावदत्—"भ्रातर्, दूरत एव मां प्रति भाषस्व । त्वत्तोऽहमतीव बिभेमि । यतः परस्पराभिघाते नाशो ममैव भविता" ।

तात्पर्यम् ।

श्रीमता सार्धं संबन्ध आप्तभावो वा दरिद्रं विपदि

पातयति । श्रीमतः प्रातिवेश्यकलहेऽयं कलहं करोतु, स वा कलहं करोतु, दरिद्र एव नश्यति।

कथाष्टाचत्वारिंशी (४८.) ।

वकमयूरयोः ।

एकदा कोऽपि वर्हीं वकं दृष्ट्वात्मनः कलापभारमुद्यम्य क्षुद्रवत्तं मत्वा जातरूपकल्पानां पिच्छानां शोभां दर्शयामास । तस्य दर्पं शातयितुं वकस्तं वदति–"रे, यदि सुन्दरपिच्छान्येव महत्त्वमानयन्ति तर्हि मयूराणां जातिः श्रेष्ठा । परं त्वहं मन्ये बालानां क्रीडनकं भूत्वा भूमौ प्रसर्पणादन्तरालगमनसामर्थ्यमधिकं महत्त्वं ददत इति" ।

तात्पर्यम् ।

यदि वयं किमपि गुणं बिभृमस्तस्यान्यस्मिन्नभावे च यदि वयं तं न्यक्कुर्मस्तर्हि तस्य गुणेनास्मासु च तस्याभावेन स किमस्मान्न न्यक्कुर्यात् । सर्वगुणैरुपेतो न कोऽपि । अतोऽन्यं प्रति पामरत्वारोपो मौढ्यम् । उपरितने प्रस्तावे मयूरो बाह्यशोभयात्मानं बहु मेने । ये तत्त्वार्थदर्शिनस्ते बाह्यगुणान्न गणयन्ति । ये बाला दुर्विदग्धास्तानेव बाह्यचेष्टा मोहयन्ति । परं ये धीमन्तस्तेऽन्तरवस्थितानेव गुणान्बहु मन्यते । यस्य स्वान्ते सद्वासना यश्च विनीतः स एव महान् । महार्घाणि वस्त्राणि दुकूलपत्रोर्णादीनि रत्ननिर्मितालंकाराश्च यदि मानार्हाः स मानस्तन्निर्मातारं गच्छति न तु परिदधतम् । इदमेवात्र सारम् । ये दुकूलादिभिरात्मनि मानमारोपयन्ति त आत्मवञ्चका ज्ञातव्याः ।

ई. नी. ५

कथैकोनपञ्चाशी (४९)।

समुच्छ्रितात्पतर्वोः ।

नदीरोधसि रूढस्यैकदा वात्याबलेनोन्मूलितस्य स्रोतसि महता वेगेनोह्यमानस्य कस्यचित्समुच्छ्रिततरोर्वीरुधः कंचनाल्पतरुं जगृहुः । परं सोऽल्पतरुर्निराबाध एवासीत्। ततः स महांस्तरुरल्पं साश्चर्यं पृच्छति—"किं भोः, प्रबलया यया मादृशोऽप्युन्मूलितस्तस्यां वात्यायां कथं त्वयात्मा संरक्षितः" । ततः सोऽल्पतरुस्तं प्रत्युवाच—"माम, आवयोरुभयोर्वर्तनं भिन्नम् । मारुते संचलितेऽहं नीचैः प्रणमामि । बलीयसा स्पर्धा निष्फलेत्यहं बोधामि । त्वं त्वात्मनो बले विश्वस्य सदर्पमशिथिलस्तिष्ठसि" ।

तात्पर्यम् ।

यस्याग्रतो वयं स्थातुमसमर्थास्तं प्रति प्रणतिरेव श्रेयोवहा । तत्रावलेपोऽनर्थकारकः ।

कथा पञ्चाशी (५०)।

व्याघ्रक्रोष्ट्रोः ।

एकदा कश्चित्कुशलो धनुर्धरो मृगयार्थं वने बभ्राम । तेन कृतेन बहुपशूनां हननेन केषांचित्पृष्ठतो गमनेन सर्वे वन्यपशवस्त्रस्ता बभूवुः । उद्विग्नमनसश्च तरुलतागृहगुहान्तरितानि गात्राणि चक्रुः । तेषामिमं संरम्भं दृष्ट्वा व्याघ्रस्तानुपेत्य धीरं प्रोवाच—"भोः पशवः, मयि जीवति युष्मानयमुद्वेगः प्राप्तः । युष्मासूद्विग्नेषु धिङ् मां मत्पौरुषं च । मा भैष्ट । धृतिं मा मुञ्चत । मे शौर्यं पराक्रमं च विश्वसित । अहमेकाकी यु-

ष्माकं रिपुमुच्छेत्स्यामि । तदलमुद्वेगेन"। एवंविधान्यन्यानि च प्रगल्भानि वचांस्युदीरयति तस्मिँल्लाङ्गूलेन भूमिं ताडयति क्रुधा भूमिमुल्लिखति च बाणासनमुक्त एकः शरस्तं कुक्षौ विव्याध । तस्मिन्नेव क्षणे स प्रबलवेदनया व्याकुलो भूत्वा सुमहतीं गर्जनामकार्षीत् । यावत्तं शरं मुखेन पुङ्खे धृत्वा निष्कासयितुं यतते तावत्कश्चिच्छृगालस्तमभ्येत्य सविस्मयं पप्रच्छ—'देव, को नामायं बलवान्रिपुः स्याद्येन भवादृशोऽपि महासत्त्व एवं विकलोऽकारि"। व्याघ्रः प्रत्यवादीत्—"भद्र क्रोष्टो, ममानुमानं वैयर्थ्यमुपागतम् । यो मामपि विकलं कृतवान्स मानुषजातीयोऽग्रतो वर्तते। सोऽस्माभिस्तिर्यग्भिर्जेतुमशक्य एव" ।

तात्पर्यम् ।

बुद्धिसाहित्यमस्ति चेद्बलशौर्ये महत्कार्यं कुरुतः । तस्याभावे तु त एव दुःखाय भवतः । केचिद्बलशौर्यवन्तस्तयोरवलम्बनेनापरीक्षितकारिणो भवन्ति । तदा शत्रुभिः पूर्वमविज्ञातं किमपि छिद्रं तैर्दृश्यते । रिपवस्तु तस्मिञ्ज्ञाते तेषां घाताय प्रयुञ्जते । ये बुद्धिमन्तस्ते बलवन्तमप्यभिभवन्ति । यथास्मिन्प्रस्तावे मनुष्यः पशुभिरजय्य इति दर्शितं तथैव प्रज्ञावानप्रबुद्धैर्बलिभिरनभिभवनीयः । रिक्तपाणिः प्रज्ञो दण्डपाणिरज्ञश्च संगच्छेते यदि प्रज्ञो बुद्धिप्रभावेण पाणिगतेन दण्डेनैव तं प्रहरति । एवं तावन्निश्चीयते यद्व्याघ्रस्येव बलशौर्ये बुद्धिमतश्छद्मप्रयोगैस्तृणीक्रियेते ।

कथैकपञ्चाशी (५१) ।

सिंहबलीवर्दानाम् ।

चत्वारो बलीबर्दा एकत्र समाचरन्तो मैत्रीभावेन वर्तमाना इतरेतरं कदापि न व्यभाक्षुः । कश्चित्सिंहस्तान्समेतानवलोक्य नित्यं व्यचिन्तयत्—"एकोऽप्येतेषां मम भोज्यो भवेत्तर्हि समीचीनं स्यात्" इति । स सिंह एकैकशस्तान्व्यापादयितुं समर्थो बभूव । परं च समेतानां तेषामुपर्युत्पतितुं न शशाक । अतः कानिचिदहानि दूरस्थ एव प्रतीक्षांचक्रे । परं संकल्पितसिद्धिं नावाप । अन्ते स निरणैषीत्—"यावदिमे एकमते वर्तन्ते तावन्न मे वशं गमिष्यन्ति । तर्हि पिशुनो भूत्वैतेषां भेदः कार्यः" । एवमनुष्ठिते ते बलीवर्दाः परस्परस्योपरि द्वेषबुद्धिं बबन्धुर्व्यभञ्जंश्च । ततः सिंहोऽश्रमेण तानवधीत् ।

तात्पर्यम् ।

यावदैकमत्यं तावच्छत्रवः किमपि कर्तुं न शक्ष्यन्ति । ऐकमत्यस्यायं महिमा । अतः सूचकवचनेष्वरिवचःसु च विश्वासो निपुणं परीक्ष्य कर्तव्यः ।

कथा द्विपञ्चाशी (५२) ।

सिंहवनेचरयोः ।

कश्चिद्वनेचर एकदा केनचित्सिंहेन संगतो भूत्वा तेन सह चिरं गोष्ठीसुखास्वादनपरो बभूव । उभयोरालापे यद्यदुदीरितं तत्तदुभयोरप्यभिमतमासीत् । परं चान्ते सिंहः श्रेष्ठ उत मानुष इति विवादास्पदमभूत् । मानुष एव श्रेष्ठ इति सम-

र्थयितुं स वनेचरो लुप्तशक्तिरभवत् । ततस्तत्रैव प्रदेश एकस्मिन्नश्ममञ्चे स्फाटिके मानुषसिंहयोः प्रतिकृती आस्ताम् ते तेन निर्दिष्टे । यतस्तयोर्या मानुषाकृतिरासीत्तया सिंहमध्यास्य तस्य सटा वलवद्धृता आसन् । सिंहस्ते दृष्ट्वा वनेचरमप्राक्षीत्— "किमेतावदेव ते साधनम् । शृणु मे वचः येन प्रस्तरदारकेणैते निर्मिते । स मानुष एवासीत् यदि स सिंहोऽभविष्यत्तर्हि विपरीतमद्रक्ष्यः" ।

तात्पर्यम् ।

ये पक्षपातिनः सन्ति त आत्मनो वचःसमर्थयितुमात्मपक्षावलम्बिनां वचनान्युपन्यस्यन्ति । अतः कस्मिन्नपि विषयेऽर्थिप्रत्यर्थिनोर्वचांस्यनाकर्ण्य सिद्धान्तो न करणीयः ।

कथा त्रयःपञ्चाशी (५३) ।

पान्थवनदेवतयोः ।

काचिद्वनदेवता शिशिरर्तौ वने भ्राम्यन्ती कंचित्पान्थं यदृच्छया ददर्श । हिमपीडया तं मृतप्रायं निरूप्य सा करुणार्द्रचित्ता भूत्वा तं वक्तुमुपचक्रमे—"भो पान्थ, निकटवर्तिन्यां गिरिगुहायां म आगमिष्यसि यदि तर्हि ते हिमबाधामपनेष्यामि" इति । ततः स पथिकस्तया गुहायामासनादिनोपचरितः । तत्र संनिहिताङ्गारवशान्महत्यप्यूष्मणि स पान्थो हिमजनितगात्रवेपथुर्जडीभूता अङ्गुलीराध्मातुं प्रववृते । तद्दृष्ट्वा सा तमपृच्छत्—"भद्र, किमेतत्" इति । स प्रोवाच—"मे करौ शीतेन जडीकृतौ । तौ तापयितुमेवं करोमि ।" सा देवता मानुषरीत्यनभिज्ञा पान्थे तं शीततापनात्मकमद्भुतं गुणमवलोक्य विस्मिता तस्य पुरतः कानिचि-

ष्फलमूलान्याहारार्थमानैषीत् । तान्यत्युष्णान्यासन्नतः पान्थ-स्तान्यपि फूत्कर्तुमारब्धः । ततो देवतया स भूयोऽप्यप्र-च्छि—"किं भोः, किमेतान्यपि फूत्करोषि" । स प्राह—"अ-त्युष्णान्येतान्यतस्तानि शीतानि करोमि" । एतन्निशम्य दे-वता संक्रुद्धा पान्थमवदत्—"भो दुर्बुद्धे, कृतं तव मैत्र्या यस्त्वमेकेनैव मुखेन शीतमुष्णीकरोषि, उष्णं च शीतीक-रोषि" एतावदुक्त्वा पान्थस्तयार्धचन्द्रं दत्त्वा बहिर्निःसारितः।

तात्पर्यम् ।

स्थाने खलु यदेकेनैव मुखेन निन्दास्तुती आचरन्तः पुमांसः सद्भिस्त्याज्या भवन्ति । अन्ये केचिदात्मनोऽर्थसि-द्धये प्रियं श्रुतिमनोहरं च जल्पन्ति परं यदा तेषामर्थसि-द्धिर्जायते तदा तेनैव मुखेन तं भर्त्सयन्ति । नैष न्यायः । अनेनैव दुष्कर्मणा बहवः सन्तो लघुतामापन् । अतो विरु-द्धवचनपटुना पुंसाऽसंगमो वरम् ।

कथा चतुःपञ्चाशी (५४) ।

देवशकटवाहकयोः ।

कश्चन निर्बुद्धिः शकटवाहकः शकटं नयन्कस्मिंश्चित्स्थले पङ्करुद्धचक्रं तं धुर्याणां महता प्रयत्नेनापि मोचयितुं न श-शाक । अक्षमस्तु स देवमह्वत्—"भो देव, दीनोऽहम् । निराश्रयोऽहम् । अस्मिन्कृच्छ्रे मे सहायो भव" । देवस्तु तच्छ्रुत्वा शकटवाहं च तूष्णीमासीनं दृष्ट्वा तमभाषिष्ट—"भो मूढ, किमिति भवानलसो जोषमास्ते" । मत्साहाय्यं वाञ्छ-सि चेदुत्तिष्ठ । धुर्यांश्चोदय । रथाङ्गे स्कन्धेनोपस्तम्भय ।

एवं कृतेऽहं साहाय्यं करोमि"। ततः शकटवाहेन तथा कृते शकटः पङ्काद्बहिरगमत्।

तात्पर्यम्।

य उद्यममवलम्ब्य दैवसाहाय्यमिच्छति स तल्लभते। निरुद्यमो दैवसाहाय्यं कदापि न लभते।

कथा पञ्चपञ्चाशी (५५)।

हंसीमनुजयोः।

कस्यचिन्मनुजस्यावास एका हंसी बभूव। सा प्रत्यहं स्वर्णस्यैकमण्डं निचिक्षेप। तद्बहुतस्तस्याशापचितिरिष्टा। परं तस्या उपचयोऽभवत्। सोऽचिन्तयत्—"अण्डनिर्गमस्थानमासादयेयमपारं धनमेकपद एव लभेय"। तदा स तस्या उदरं विदारयामास। ततो यावदन्तरवलोकयति तावद्रिक्तमेव ददर्श। पश्चाद्बहुतप्यत।

तात्पर्यम्।

ईश्वरो जगदात्मा यं प्रति त्यागभोगायालंभविष्णु धनं ददाति तस्य संग्रहेच्छा चेन्मितव्ययेन तस्मादेव किंचित्किंचित्स उद्धरेत्। इदमनादृत्य योऽतिलोभेनाकाण्डे श्रीमान्भवितुमीहमानो महति साहस आत्मानं योजयति स साहसे वन्ध्यप्रयत्नो भूत्वा मूलधनमपि हारयति।

कथा षट्पञ्चाशी (५६)।

स्वेच्छाचारिणोऽजस्य।

कश्चिदजः स्वेच्छया चचार। एकदा हलधुरि नियुक्तं कमप्युक्षाणं विलोक्य तमाह—"अरे उक्षन्, त्वं स्वामिनः

कृते स्कन्धे कुशमूढ्वा यामचतुष्टयेऽपि हलं चालयसि ततोऽहं जाने यथा त्वं कोऽपि हीनवृत्तिरतिभारवाहकः सत्वोऽसि । पराधीनतैव ते प्रिया । अन्यथैवं न व्यधास्यः । पश्य कथमहं कालं नयामि । स्वैरं गच्छामि, शीतलच्छायामध्यासे, नृत्यामि, इतस्तत उत्पतामि, तृषितः सन्नच्छं निर्झरगतं वारि पिबामि । त्वं कलुषमपि वा न लभसे" । स उक्षा सर्वमप्यवहितमनसा शुश्राव । किंचिदप्यनुक्त्वा हलकर्षणे भूयः प्रयुक्तः । ततः कियति काले याते ग्रामदेवतामुद्दिश्य कोऽप्युत्सव आजगाम । तस्मिन्दिने तस्याजस्य स्वामी कुसुममालाभिस्तमलंकृत्य देवताया उपहारं कर्तुं तमनैष्ट । तस्य ग्रीवायां यावत्सोऽसिधेनुकां व्यापारयति तावत्स उक्षा तत्रागत्य तं कर्णे पृच्छति—"रे मूर्ख, किं ददर्शिथ तव स्वेच्छाचारस्योदर्कम् । अद्य यावत्ते स्वामी यत्त्वां जीवन्तं रक्षितवांस्तदेतदर्थमेव । ब्रूह्यधुना कतरस्यावस्था साधीयसी, तव मम वा"।

तात्पर्यम् ।

अन्यं विपदि समापतितं वीक्ष्य तस्योपालम्भोऽधमस्य मूर्खस्योन्मत्तस्य व्यापारः । दैवचक्रं सर्वदा भ्राम्यति । एकस्य विपदोऽन्यं संक्रामन्ति । अन्यस्य कस्यचित्संपद एनं संक्रामन्ति । एवं संपद्विपदोर्विनिमयो भवति । तथा हि—"नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण" । अस्मिन्कथानक एतदपि दर्शितं भवति यत्स्वेच्छाचारिणां स्वच्छन्दानुवर्तिनां परिणामो दुःखं भवति । ये पुनरुद्यमिनस्ते स्वोद्यमस्य फलमनुभूय सुखमश्नुवते । ये निरङ्कुशा निर्मर्यादास्ते जीविका-

मलभमाना लोकान्वञ्चयन्ति बलात्कारं कुर्वन्ति, स्तेये व्यापृता भवन्ति । ईदृशानि दुष्कर्माणि कुर्वाणा महद्भाग्यमुपभुञ्जाना ये न तादृशा ये च स्वकष्टार्जितेनैव द्रव्येण वृत्तिं कुर्वते तान्हसन्ति । परन्तु ये चौरा वञ्चका मिथ्याभाषिणस्तेषां भाले कारागृहवासः शूलारोपणं वा लिखितमेव विधात्रा । तेषामुदर्कं दृष्ट्वोद्यमिनः स्वामेव स्थितिमसंशयं श्रेयसीं मन्येरन् । अन्यच्च ये स्वेच्छाचारास्ते व्यापारशून्यत्वाद्दुर्व्यसनिनो दानभोजनासनशय्यादिषूच्छृङ्खला भवन्ति । अनेन हेतुना ते काममृत्युवशा भवन्ति ।

कथा सप्तपञ्चाशी (५७) ।

द्वीपिगोमाय्वोः ।

एकदा द्विपी चेतस्येवमकरोत् । मद्देहगतांश्चित्रवर्णान्सुन्दरांश्च बिन्दून्विलोक्य रूपे सिंहोऽपि मत्सादृश्यं कर्तुं न शक्ष्यति । केऽन्ये पशवः । ततः सत्त्वमात्रं धिक्चकार । तं क्रोष्टोवाच—"द्वीपिन्, महानयं ते भ्रमः । यदहं कथयामि तत्परमार्थतो गृहाण । यन्मनःसमुन्नत्याद्यन्तरङ्गगुणेभ्यो विना बाह्यगुणैर्भूषणं नैव भूषणमिति सन्तः स्मरन्ति," ।

तात्पर्यम् ।

यः सुन्दरः स सुभगंमन्यो भूत्वा यदि वर्तेत तर्हि तस्य सुभगत्वं तस्य गुणत्वं नावहति । स्त्रीषु या गुणवती सुभगा च तस्या एव कीर्तिः प्रथ्यते ।

कथाष्टपञ्चाशी (५८)।

बिडालशृगालयोः ।

कश्चित्स्थूलोतुः क्रोष्टा चारण्ये प्रच्छायशीतले शिलातले राजनीतिविषये गोष्ठीसुखमन्वभूताम् । तदा क्रोष्टा ललाप—"भो मार्जार, अत्रस्थानस्यान्यदि महद्व्यसनमुपतिष्ठेत तर्ह्यहं सहस्रप्रकारैरात्मानं रक्षिष्यामि । परंतु तवार्थेऽहमतीव क्लिश्ये । कथं त्वं भवसीति" । बिडालोऽवादीत्—"सखे, एकां युक्तिमहं दृढं जाने । सा निष्फला चेद्दुर्गतिं प्राप्स्यामि" इति । क्रोष्टाह—"एवं चेद्बलवतीव मे चिन्ता मन्दभाग्यस्य तव कृते । एकां द्वे वा युक्ती ते शिक्षयामि परंत्वपि जानासि नायं काल उपदेशस्य । स्वार्थ एवेदानीमनुष्ठातव्यः । बाढम् । प्रणामः, प्रणामः । साधयामि तावदहम् । एतावदुक्त्वा प्रचलितः । अस्मिन्नेवान्तरे श्वभिरनुसृता व्याधास्तस्यानुपदमेव प्राप्ताः । तदा बिडालो वृक्षारोपणरूपामेकामेव युक्तिमज्ञासीत्तामाश्रित्य रक्षित आत्मा तेन । क्रोष्टुः सहस्राणामेकाप्युपयुक्ता नाभूत् । तस्मिन्व्यस्तचेतसि चत्वारि पञ्च वा पदानि यात्यनुधावन्तः श्वानस्तं पराजिग्यिरे ।

तात्पर्यम् ।

अन्यतोऽधिकं मे प्रज्ञाबलमिति यो विकत्थते स प्रायः स्वयं मूर्खोऽस्ति । यो धीमान्स समये बुद्धिप्रभावं दर्शयेत् । वृथाप्रगल्भनेन किं जना आयासयितव्याः । एकापि पूर्णज्ञाता युक्तिः समये स्फुरन्ती च यमर्थं साधयति सोऽर्थो

युक्तिसहस्रेणापि न सिध्यति । सहस्रबुद्धिर्विचार्य कुण्ठितो भूत्वान्ते विलोभ्यते । तथैवैकापि विद्या यदि सम्यगधीता सैव कार्यसाधिका भवति । नैकविद्याज्ञाने समय एकस्या अप्यनुपयुक्तत्वे प्रयोजनाभावेन दुःखमेव संपद्यते ।

कथा नवपञ्चाशी (५९) ।

पारावतचरणायुधयोः ।

कश्चिन्नर एकं पारावतं धृत्वा तस्य गरुतोः कानिचित्पिच्छान्युद्धृत्य तं कृकवाकाधिष्ठिते वाटे मुमोच । तत्रस्थं तं ताम्रचूडा वारंवारं चञ्च्वा प्राहार्षुः । तेभ्यो विकीर्णेभ्यो धान्यकणेभ्यस्तं न्यवारयन् । एवं कतिचिदहानि क्लेशेन यापयित्वा स समाहितो बभूव सोऽभ्यधात्—"नामी गृहमेधिनो धर्मं जानन्ति । यतो गृहागतस्यातिथेः सत्कारमकृत्वा तं पीडयन्ति, दयाहीनाः शठा इमे" इति । पश्चात्सोऽद्राक्षीत् । त एव कुक्कुटाः सप्तकृत्वो दशकृत्वो मिथः कलहं कृत्वा संप्रजह्रिरे । तदा समाधाय सोऽभिधत्ते—"ये ज्ञातीनप्युपद्रवन्ति तेऽन्यजातीयं मां बाधन्त इत्यस्मिन्किं चित्रम्" ।

तात्पर्यम् ।

ये ज्ञातिष्वपि कलिमुत्पादयन्त्यन्योन्यमुपप्लवन्ति च तैरन्यजातीयास्त्रासिताश्चेत्केनापि विषादो न कर्तव्यः ।

कथा षष्टी (६०)।

कस्तूरीमृगस्य ।

कस्यचिन्मृगविशेषस्य नाभौ कस्तूर्युपलभ्यते । अतस्तस्मिन्दृष्टमात्रे जनास्तमनुधावन्ति, तं शस्त्रघातं घ्नन्ति । एकदा कंचिदेवंविधं मृगं पुरतो गच्छन्तं विलोक्य व्याधाः श्वानश्च तस्य पृष्ठतो लग्नाः । अनेन मृगं महद्भयमुपस्थितम् । कथमियमापन्निस्तरणीयेति स न बुबोध । अत्रान्तरे स मृगो व्यचिन्तयत्—"इमे घातुकाः कस्तूर्यर्थे मां जिघांसन्ति । नान्यो हेतुः । तस्यां त्यक्तायां सुखी भवामि" इति । ततो धैर्यमवलम्ब्य तस्मिन्ननुष्ठिते व्यसनान्मुमुचे ।

तात्पर्यम् ।

एकोऽन्यमनुधावति तस्य हेतुः प्रायो लोभाद्व्यतिरिक्तो न । अतो यदा यदेयमापदापतति प्रतीकारोपायश्च दृग्गोचरो न भवति तदा यस्य वस्तुनो लोभेन शठा अस्मान्दुन्वन्ति तत्त्यजेदात्मनो मानहानिमकृत्वात्मानं संरक्षेत् । मानरक्षणे जाते यदि सर्वस्वहानिरुपतिष्ठेत सा हानिरूपेण न ग्राह्या ।